CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

SRI MAHAVEERAVAIBHAVAM

॥ श्रीमहावीरवैभवम् ॥

By

Vidwan Vedānta Sāragna Kotikanyādānam

S. KRISHNATĀTĀCHĀRYA, B. A.,

No. 62, VII Main Road, 2nd Block, Jayanagar Extension,

BANGALORE.

श्रीरङ्गस्थ श्रीवाणीविलासमुद्रणालये

मुद्रितम् ।

१९६०

Price Rs. 1-50 NP.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

94

RI MAHAVEERAVAIBHAVAM

॥ श्रीमहावीरवैभवम् ॥

1508

By

Vidwan Vēdānta Sāragna Kotikanyādānam

S. KRISHNATĀTĀCHĀRYA, B. A.,

62, VII Main Road, 2nd Block, Jayanagar Extention,

BANGALORE.

श्रीरङ्गस्थ श्रीवाणीविलासमुद्रणालये

मुद्रितम् ।

421



Price Re. 1-50 NP.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

First Edition 1960 January—500 Copies.

All right reserved by the Author.



Copies can be had of the Author.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः ॥

॥ प्रास्ताविकम् ॥

भोः प्रेक्षावत्प्रमुखाः पाठकमहाभागाः! विदितमेवैतद्विदुषां श्रीमत्कविकथकसिंहैर्वेदान्ताचार्यैर्विरचितः सुकुमारगुम्भगम्भीरः श्रीरघुवीरगद्याख्यः कश्चन प्रबन्धराजो विजयतेतरामिति। प्रणीता चास्याद्भुता विस्तृता च व्याख्या महनीयैर्विद्वद्वरैः। तदनुसारेण, भगवत्प्रसादितसदाचार्यश्रीसूक्तिसंशीलनैः वेदान्तसारज्ञैः एट्टूरिम्मडि तिरुमलै लक्ष्मीकुमार कोटिकन्यादानं श्रीमत्कृष्णताताचार्यसूरिभिः भगवन्मुखोल्लासार्थं प्रणीतोऽयं महावीरवैभववर्णनाख्यः अनेकंविधश्रेयस्साधनभूतः प्रबन्धः। तन्मुद्रणस्य बहुद्रव्यसाध्यत्वात्, निवृत्त्येकनिरतैस्तैर्बहुतिथात्कालादेतन्मुद्रणव्यापारोऽनादृतः। तत्तादृश श्रीरामभद्रगुणगणवर्णनपवित्रितः शब्दार्थरामणीयकातिशयितोऽयं प्रबन्धः "जीर्णमङ्गे सुभाषितम्", – इतिवद्विफलो मा भूदिति तदन्तेवासिभिरस्माभिस्तदनुज्ञया विद्वत्परितोषार्थं पञ्चषोदारसहृदयानां साहाय्येनैतन्मुद्रणभारः कथमप्यस्मन्मूर्ध्न्यारोपितः। श्रीमद्भिरेनं पठित्वा तदारम्भोऽयं सफलीक्रियताम्; अत्र कर्माणि यथारुचि यथाशक्ति साहाय्यकरणभारेणाधरीक्रियतां चास्मन्मूर्धेति विज्ञाप्य विरम्यते।

"आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ॥"
इत्याह किल महाकविः।

श्रीरामचन्द्रचरित नामप्रभावश्च श्रुतिस्मृत्यादिषु बहुधा प्रपञ्चितः। श्रुतौ तावद्ऋग्वेदे;

"भद्रो भद्रया स च मा न आगात् स्वसारं जारो अभ्येति पश्चात्।
सुप्रकेतैर्द्युभिरक्तुर्वितिष्ठन् रुशद्भिर्वर्णैरभिराममस्थात ॥" – इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"सर्वजन्मसु यत्पापं ज्ञानाज्ञानकृतं भवेत् ।
सर्वं दहति रामस्य कीर्तनं पापनाशनम् ॥"

इति वृद्धपराशरः ।

"संसारतापतप्तानां जन्तूनां हतचेतसाम् ।
श्रीमद्रामायणाख्यानपीयूषं भेषजं स्मृतम् ॥"

इति तत्त्वसंग्रहे, – इत्यलं विस्तरेण ॥

इति भवद्विधेयाः

H. RAMASWAMY IYENGAR

V. R. NARAYANAN

P. G. SREENIVASAN.

— प्रीयतां जानकीसखः —

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

विद्वद्वरैः ब्रह्मश्री कोटिकन्यादानं कृष्णताताचार्यैः संकलितो महावीरवैभवाभिख्योऽयं निबन्धः सम्यक् परिशीलितः। निबन्धोऽयं श्रीमद्रामायणग्रन्थमालंब्य महावीरवराग्रेसरस्य रघुवंशमुक्तामणेर्भगवतः श्रीरामचन्द्रस्य लीलामानुषचारित्रवर्णनव्याजेन प्रवृत्तोऽपि न तावन्मात्रे विश्रान्तः। किन्तु प्रभुसम्मितोक्तिगम्यस्यार्थस्य सुहृत्संमितोक्तिभिरुपबृंहणेन विस्पष्टीकरणवत् निखिलनिगमान्तवेद्यस्य, कविवरेण्येन श्रीमद्वाल्मीकिमुनिवरेण्येनोपनिबद्धस्य महापुरुषचरितस्य अन्तर्निगूढानिखिलनिगमान्ततत्वार्थाविष्करणेन नूनं महावीरवरस्य श्रीरामभद्रस्य वैभवमिव अनिच्छतामपि वाचकसहृदयानां हृदये सहसैव ब्रह्मानन्दानुभवस्यापि वैभवमनुभावयतीति पाठकमहोदयानां स्वहृदयमेव प्रमाणम्।

अपि च विचित्रतरपदबन्धोपबन्धितेऽस्मिन् निबन्धे अन्योऽप्ययं महान् विशेषः, यत् सामान्यतो रामायणपारायणपरायणानां मन्दमतीनाममन्दमतीनां वा कुत्रचित् कदाचित् कथंचित्संभाव्यमानानां कथमनतिप्रौढस्यापि राघवस्य अतिप्रौढैरपि राजन्यपरिवृढैरनिर्व्यूढे त्रैयंबकधनुर्भङ्गे संरंभः, कथं वा दारुमययोरचेतनयोः पादुकयोः चेतनासाधारणराज्यभरणनैपुण्यम्? कथङ्कारं वा पुराणपुरुषावतारस्यातिमानुषप्रभावस्यापि राघवस्य प्राकृतमानुषवत् स्वमहिषीवियोगेन विषादः? त्रिविक्रमपराक्रमस्यापि कथमक्रमेण वालिवधोपक्रमः? इत्यादिविविधसन्देहसन्दोहानां समुचिताभिः प्रमाणवचनयुक्त्युक्तिभिः अपोहनं साधुकृतमस्तीति।

स्थालीपुलाकन्यायेनैतावदुक्तम्, किं बहुना? सर्वथैवायं ग्रन्थः, वाङ्मनसातिशायिमहावैभवस्यापि श्रीरामचन्द्रस्य वैभवमनुभावयन् सर्वोपादेयतामर्हति। अस्य ग्रन्थकर्तुरपि महापुरुषवरवैभवाविष्करणचण-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धिषणावैभवं संभावयति। एतद्ग्रन्थपठनपाठनभाग्यवतां महाजनानां परम-पुरुषवैभवानुसन्धानमहावैभवमपि समुद्भावयति ।

ईदृशं ग्रन्थरत्नमुपहृतवतः श्रीकृष्णताताचार्यान् भगवान् श्रीराम चन्द्रः आयुरारोग्यभाग्यादिप्रदानेनानुगृह्णात्वित्याशास्महे इति ।

के. पि. शंकरशास्त्री,
आस्थानविद्वान्, वेदान्तप्राध्यापकः ;
विद्वन्मणिः, विद्याभूषणम्,
साहित्यवेदान्तमीमांसावेदभाष्यविद्वान्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

'महावीरवैभव' नामकोऽयमपूर्वः प्रबन्धः श्रीमद्भिः विद्वद्वरेण्यैः वे-ब्र-श्री के. एस्. कृष्णताताचार्यैः विरचितः प्राकट्यमानीतोऽधुना। प्रबन्धश्चायं सुदीर्घसमासगुम्फितोऽपि अतीव मधुरपदबन्धुरः श्रोतृणां श्रवणपुटद्वारा हृदयान्तरालं प्रविशन् नितान्तमानन्दमातनुत इति महत् प्रमोदस्थानम्।

भगवद्गुणवर्णनं नाम कोऽप्युत्सवो भक्तानाम्। प्रसिद्धमेवेदं उपनिषत्सु, यत् भगवद्गुणोपासनं प्रभवति चेतसः स्थिरतायै, तदनुगुणतया परम्परया भगवद्गुणवर्णनमपि। यद्यपि वाल्मीक्यादिभिः परमर्षिभिः कृतकरक्षेपेयं रामकथा; तथापि श्रीमद्वाल्मीकिकृते आदिकाव्ये तत्र तत्र विप्रकीर्णतया लक्ष्यमाणाः भगवद्गुणाः अत्र एकत्र संकलय्य प्रादर्शिषत इत्यस्त्येवात्र प्रतिपत्तिसौकर्यम्। न केवलं संस्कृतं पिपठिषूणां व्युत्पित्सूनां पदतदर्थेषु व्युत्पत्तिमादधात्ययं प्रबन्धः, किन्तु साधकानामुपासकानां भगवद्गुणोपसंहारप्रदर्शनेन उपासनायां साहाय्यमपि। काण्डानुसारेण विषयान् पल्लवयन् प्रबन्धोऽयं प्रोल्लसति।

रामकृष्णयोः अवतारवैलक्षण्येऽपि साम्यमपि सम्यगत्र प्रादर्शि। वनगमनप्रसङ्गे श्रीरामस्य धैर्यम्, निषादेऽपि सौहार्दम्, जटायुसंस्कारकरणप्रदर्शितं सौशील्यं, श्रमण्याः शबर्याः वृत्तान्तेन ज्ञायमाना प्रपत्तिसिद्धिः, सुग्रीवपरिग्रहप्रदर्शितसर्वेश्वरत्वं, विभीषणस्वीकारसन्दर्भसुव्यक्तसकृत्प्रपन्नजनसंरक्षणदीक्षितत्वम् – एवमादयो गुणाः व्यञ्जनया वृत्त्या सहृदयानामन्तः रसभावमापाद्यमानाः सम्यक् चित्रिताः। वालिवधसमर्थनमपि युक्तिभिरत्र न्यबन्धि। शारीरकचतुरध्याय्यर्थाः अपि अत्र सुयोजिताः। श्रीमद्भागवतादीतरग्रन्थेभ्यः श्लोकानुद्धृत्य सन्दर्भानुसारेण प्रकृतार्थः विकासितः तत्तद्ग्रन्थावलोकने कौतुकं जनयतीति महान् संतोषः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ईदृशमपूर्वं ग्रन्थं प्राकट्यं नीतवतः वे-मू-ब्र श्री के. एस्. कृष्ण-ताताचार्यमहोदयान् एतद्ग्रन्थक्रयणादिद्वारा सर्वे जनाः प्रोत्साहयेयुः इति प्रत्येमि ।

'पण्डितवर' न्यायसाहित्यवेदान्तविद्वान्

H. ANANTAMURTY SHASTRY,
Tarka Asst. Professor,
Chamarajendra Sanskrit College,
Bangalore,

20—1—1960,
Bangalore.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

इह खलु भगवान् सर्वशक्तः पुरुषोत्तमः श्रीमन्नारायणो दुष्ट-निग्रहद्वारा शिष्टानुदिधीर्षुर्लीलाकलितवपुर्दाशरथिर्भूत्वा जन्मना किल मानुष्यकमनुजग्राह्। मानुषलीलाश्च सम्यगनुतिष्ठासुः सतामादरणीयेन पथा प्रवृत्तः स्वयं गुणसमुद्रः शिष्टसंमतां धर्मवेलां कदाप्यनुल्लङ्घमानः सकललोकस्य संमान्यचरितो विरेजे। दैत्यवानरपक्षिभल्लूकेष्वपि निरुपम-वात्सल्यं प्रदर्श्य 'पण्डिताः समदर्शिनः,' 'गुणाः पूजास्थानम्', 'भक्तास्तेऽतीव मे प्रियाः' इत्यादिवचसामात्मनः प्रभवत्वं प्रकाशयामास। सोऽयमादिपुरुषः श्रीरामः परमपावनीं गङ्गामिवात्मनश्चरणात् सुमनो-मनोविनोदचणां, स्वसंनिधानेन भुवनानि भवनानि च पुनानां प्रवर्तयामास रामायणमहानदीम्। भागीरथ्या इव हिमाचलः श्रीम-द्रामायणस्य प्रथमप्रकाशसाधनं बभूव वाल्मीकिमहर्षिः। यत उक्तम्—

वेदवेद्ये परे पुंसि जाते दशरथात्मजे।
वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना॥ इति।

अदश्च श्रीमद्रामायणं विगलितवेद्यान्तरस्य रसस्य परायणमिति सहृदयाः; परमपुरुषस्य पुण्यनाम्नां मङ्गल्यगुणगणानाञ्चाकर इति भक्तजनाश्च संसेवन्ते।

क्वचिदभिधया, क्वचिल्लक्षणया, क्वचिद्व्यञ्जनया च श्रीरामचन्द्रे महनीयगुणधाम्नि विद्यमानानां सकलसज्जनपूजनीयगुणानां प्रतिपादनेन निखिलाः संसारिणो जनाः भक्तिमार्गे व्युत्पद्यन्ताम्, व्युत्पन्नाश्च वैष्णवं पदं भजन्ताम् इत्येव निरवधिकारुणिकस्य वाल्मीकिमहर्षेः परमोद्देशो-ऽधिगम्यते।

वृत्तिवैचित्र्येण प्रतिपादितमिदं गुणवैभवं क्वचिन्निगूढमिति कृत्वा स्फुटमुपपादनार्थं श्रीमन्तः सुगृहीतनामानः कोटिकन्यादानं कृष्ण-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तातार्याः वेदान्तशास्त्रे परिनिष्ठितधिषणाः "श्रीमन्महावीरवैभव-वर्णनम्" नाम भक्तजनमस्तकधार्यं ग्रन्थमिमं जग्रन्थुः। एते च महोदयाः आङ्गलभाषायां विश्वविद्यानिलयपदवीधरा अपि देववाण्यामेव विशेषतः श्रद्दधानाः सर्वदा सद्ग्रन्थावलोकन प्रवचनादिभिर्मानुषभूयं सफलतां निनीषन्तो भगवतः श्रीरामचन्द्रस्य सेवां विना सर्वोऽपि बाह्यव्यवहारो निःसार इति निश्चिन्वानाः सर्वेषामादरभाजनतां वहन्ति।

ग्रन्थेऽस्मिन् भागवतपुराणादिमहाग्रन्थसंवादेन श्रीमद्रामायण-श्लोकानां भगवतः पुरुषोत्तमस्य गुणवैभवप्रदर्शने तात्पर्यं समुचित-युक्तिभिरर्थविवेकपुरःसरं निरणायि। आशासे च निखिलगीर्वाण-वाणीप्रणयिनः सज्जनाः इमं ग्रन्थं संगृह्य श्रीरामचन्द्रगुणसौरभसंप्लाविते भक्तिप्रवाहे निमज्ज्य परिशुद्धान्तरङ्गाः साक्षात्कृतमहावीरवैभवा मोदन्ताम् इति॥

विदुषां वशंवदः

ता. २४–१–१९६०

एन्. रङ्गनाथशर्मा

व्याकरणशास्त्राध्यापकः

श्री चामराजेन्द्रसंस्कृतमहापाठशाला,

बेंगलूरु नगरी.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

SOME OPINIONS.

Mahavira Vaibhavam.

Original composition in Sanskrit is a rarity nowadays; and it is a heartening sign that around us there are still scholars like the learned author of Sri Mahavira Charitam, who can write works of outstanding merit. The story of MAHAVIRA CHARITAM centres round its hero, Sri Ramachandra and dwells with devotion on his valour and compassion. The narrative is simple and lucid. The author has based it on Sri Venkatanatha's (Vedantha Desika) '*Raghuvira Gadyam*' and provided an excellent exposition of that work visa-vis *Valmiki Ramagana*. The prose diction is elegant and the interpretation always interesting and often revealing. They show the depth of the author's scholarship as well as the range of his vision, a rare combination. The book should appeal to all lovers of chaste Sanskrit.

If works of this type are prescribed as text books in the college classes they are bound to have an elevating influence on the mind of youth besides fostering an interest in our ancient heritage. I do wish that the enlightened public will give adequate support for the publication of this brief yet attractive work.

K. GURU DUTT,

Retd. Director of Public Instruction in Mysore,
Chairman. Mysore State Electricity Board,
President, Mysore Sanskrit Academy,
President, Mythic Society, Bangalore, etc.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

January 30, 1959.

Mahavira Vaibhavam.

This prose work by Vedantha Vidwan, Vedantha Saragnya, K. S. Krishna Thathacharya is a character sketch of Sri Ramabhadra, the Hero of Ramayana. There are very few people in India who do not hold the name of Sri Ramachandra in great veneration. It is in Valmiki Ramayana that we find full details of the divine exploits of Sri Rama. In Him are combined the highest sweetness of temper and uncommon kindness with incomparable valour and firmness on the battle-field. Many are the exalted qualities of Sri Rama that have endeared Him to the great poets and singers of this ancient land.

The present work is not unworthy of this great name. The author exhibits keen appreciation of the religious and ethical significance of the deeds and words of the Divine Being and has expressed it in elegant Sanskrit prose. He has kindly read the whole work before me and I have no hesitation in saying that it is a work of high literary merit and that it will take an honoured place in Sanskrit Literature. The author deserves all encouragement at the hands of those who are interested in the advancement of Sanskrit culture and learning.

B. VENKATESACHAR,
Retd. Professor of Physics, Central College,
&
Retd. Director, Indian Institute of Science, Bangalore.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

॥ अस्मत्सर्वगुरुभ्यो नमः ॥

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरघुनन्दनपरब्रह्मणे नमः ॥

॥ श्रीमहावीरवैभवम् ॥



ब्रह्मविद्याप्रदानेन मम सर्वाघनाशनम् ।
संश्रये श्रीनिवासार्यमन्यानपि गुरूत्तमान् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥

नमस्तस्मै कस्मैचन भवतु निष्किञ्चनजन-
स्वयंरक्षादीक्षासमधिकसमिन्धानयशसे ।
सुराधीशस्वैरक्षणकुपितशापायुधवधू-
दृषत्तादुर्जातप्रशमनपदाम्भोजरजसे ॥

"स्वरूपरूपविभवगुणकर्माणि शार्ङ्गिणः ।
व्याचक्षीत निबध्नीयात् शृणुयाद्विलिखेत्पठेत् ॥"

इति सर्वशरण्येन भगवता सच्छास्त्रप्रवर्तने नियोगदानेन मोमुह्यमानान्तःकरणोऽयं जनः,

"गुणान् गुणवतो देव देवकल्पस्य धीमतः ।
प्रियानानन्दनान् कृत्स्नान् प्रवक्ष्यामोऽद्य तान् शृणु ॥"

इत्युक्तरीत्या समस्तजनचेतस्संवननेषु श्रीरामचन्द्रगुणेषु, "गुणैर्दास्यमुपागतः" — इतिवदत्यन्ताभिनिविष्टचित्ततया, श्रीवाग्देवीप्रथमावतार-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भुवा भगवता वाल्मीकिमहर्षिणाऽपि लेशतो गीतश्रीरामायणकथानुक्रमेण, तद्गुणवर्णनरमणीयः प्रबन्धः आरभ्यते। अनुगृहीतो हि श्रीमद्वेदान्तगुरुशेखरैः रघुवीरगद्याख्यः निरतिशयोत्कर्षः प्रबन्धः। प्रणीता चास्याद्भुता विस्तृता च व्याख्या महनीयैर्विद्वद्वरैः। तदत्र कृतकरस्यात् अस्मद्यत्न इति विभीमः। तथाऽपि,

"यदि क्षुण्णं पूर्वैरिति जहति रामस्य चरितं
गुणैरेतावद्भिर्जगति पुनरन्यो जयति कः।
स्वमात्मानं ... ...
... ... कथमुपकरिष्यन्ति कवयः॥"

इति श्लोकोक्तन्यायेन तत्र प्रवृत्ता वयं श्रीरामभद्रदयान्वयत्यागासमर्थाः स्मः। किं च,

"गङ्गासङ्गेन नैर्मल्यं रथ्याद्भिर्लभ्यते यथा।
वाचो विशुद्धिसिद्ध्यर्थं संगम्यन्ते गुरोर्गिरः॥"

इति श्री जयतीर्थमुनिमनोरथोऽप्यत्रास्माकं प्रेरकः। एवं श्रीरामभद्रगुणसागरेऽवतीर्णः अतलस्पृगाप्लुतोऽयं जनः महतां प्रहसनोचितः स्यादेव। श्रीरामचन्द्रप्रभाववर्णनविषयत्वात्साहसस्य दयनीयोऽयं साहसिको महताम्।

अथ आश्रितसन्त्रासध्वान्तविध्वंसनार्थमुदितः परमव्योमभास्करः श्री सीतारामः "रोचनो रोचमानः शोभनश्शोभमानः कल्याणः" — इत्येवंप्रकारकः जयति। भवतपनतापितभक्तजनभद्रारामस्य श्रीरामभद्रस्यावतरणात् किमधिकं हितं जगतः? श्रीरामभूतं जगत्सर्वम्। रामो रामो राम इति प्रजानां कथा भवन्ति। ततः किं हिततरम्? "बहवो नृप कल्याणगुणाः पुत्रस्य सन्ति ते" — इति सर्वैः कल्याणैरेव गुणैः समस्तदेवतासार्वभौमोऽयं श्रीचक्रवर्तितनूजः विरुरुचे।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं सत्स्वपि गुणान्तरेषु 'कश्च वीर्यवान्?' 'नियतात्मा महावीर्यः' इति श्रीरामायणोक्तक्रमेण तस्य वीर्यगुण एव प्रथमतरं धियमधिरोहति। युक्तं चेदं यद्भगवदवतारस्य अनिष्टनिरसनपूर्वकेष्टप्रापणरूपाश्रितरक्षणैकफलत्वेन, तादृशरक्षणस्य वीर्यादिगुणसाध्यत्वात्, तद्रक्ष्यभूतैरस्माभिः तादृशगुणग्रहणेन स्तवनम्। तथैव निगमवन्दिनाम् शैली, "जय जय जह्यजां" इति। अयमेव क्रमोऽनुसृतः श्रीमद्वेदान्तगुरुशेखरैरपि, "जय जय महावीर" इति। वर्णाश्रमधर्मपरिपालनधुरन्धरेक्ष्वाकुवंशविहितावतारं श्रीरामभद्रं प्रति सर्वोत्कर्षतां ते आशासते। तथा हि — स्वयमविकृतस्सन् परान् विविधमीरयति (विद्रावयति) इति वीरः, मह्यते (पूज्यते) इति महान्, महांश्चासौ वीरश्च महावीरः, निस्समाभ्यधिकवीर इत्यर्थः। "रिपोः प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमैः" — इति प्रथिततरवरभुजबलदुराधर्षेण त्रिलोकजयिना मानधनेन रावणेन प्रतिपक्षेणापि बहुमाननीयं ह्यस्य वीर्यम्! अस्य निरतिशयवीर्यादिगुणाननुभूय तच्छ्वशुरः जनकराजः, "इमौ कुमारौ भद्रं ते ..." इति दृष्टिदोषपरिहारार्थं मङ्गलमाशास्ते। ऋषयोऽपि "जयतां राघवस्संख्ये" — इत्याशासते स्म। भगवान् वाल्मीकिरपि, "कोन्वस्मिन् सांप्रतम् लोके" — इति प्रथमतः गुणवान् (गुणसमुदायवान्) कः? इति पृष्ट्वा, ततः "कश्च वीर्यवान्" (वीर्यादिगुणवान् कः)? इति प्रत्येकं प्रत्येकं पप्रच्छ। "नियतात्मा महावीर्यः —" इति श्रीनारदेन प्रत्युक्तवीर्य एव विरोधिनो रावणशक्रजिदादयोऽपि नितरां व्यामुग्धाः। यथोक्तम्,

"यस्य विक्रममासाद्य राक्षसा निधनं गताः।
तं मन्ये राघवं वीरं नारायणमनामयम्॥

इति। "आत्मानं मानुषं मन्ये —" इति ब्रह्मत्वं अत्यन्तं विसस्मरेऽवतरता भगवता। यद्यपि सः न स्वयं ब्रह्मत्वं प्रदर्शयामास, तथाऽपि तच्छरेण प्रलयाग्नेरपि घोरतरं सागरशोषणरूपोपसंहर्तृत्वादिकं प्रादर्शि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पारावार पयोविशोषणकला पारीण कालानल ज्वालाजाल विहारहार विशिख-व्यापारघोरक्रमो हि सः! तादृशबृहत्वं तच्छरस्य! शूरतमः शत्रुपक्ष-प्रधानमल्लः शक्रजिदेतस्मिन् सागरशोषणविक्रमं दृष्ट्वा विसिस्मिये। तेन च राममुत्तमवीरं स्वसदृशप्रतियोद्धारं मेने इति सुन्दरं प्रदर्श्यते काव्य-प्रकाशोदाहृते,

"क्षुद्रास्सन्त्रासमेते विजहत हरयः क्षुण्णमत्तेभकुम्भाः
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः।
सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः
किंचिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि॥"

इति श्लोके। यो महता प्रयत्नेन पूर्वं गुप्तः स सर्वेश्वरभावः स्वेनैव सागरशोषणोद्योगसमये उद्घोषितः, "सागरं शोषयिष्यामि" इति।

"कुशली यदि काकुत्स्थः किं न सागरमेखलाम्।
महीं दहति कोपेन युगान्ताग्निरिवोत्थितः॥"

इति सीतया पृष्टच्छे हनूमान्। "जगत्सशैलं परिवर्तयाम्यहम्"— इति च क्रोधसमये उक्तं भगवता। "पिशाचान् दानवान् यक्षान् पृथिव्यां ये च राक्षसाः। अंगुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर॥" इति च सुग्रीवप्रत्यायनसमये। सागरेण महदपराद्धम्। तद्दहनं सीतामभिनन्दयेत्, इन्द्रजिदादिशत्रूंश्च विस्मापयेत्, अपराधिनं समुद्र-राजं च शिष्यात्। पूर्वं श्री परशुरामात्मना जमदग्निपीडनभवं क्रोधाग्निं संतर्पयिष्यन् इमां क्षितिं त्रिस्सप्तकृत्वः सन्ततक्ष; इदानीं समुद्रदहने उद्युक्तः।

एवं सर्वोत्कर्षेण वर्तमानः महावीरोऽयं महाधीरधौरेयश्च जयति। सत्स्वपि विकारहेतुषु निर्विकारचित्ता ये तेषां धुरन्धरत्वान्महाधीर-धौरेयोऽयम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः"—इति कविसार्वभौमः। अत्र च श्रीरामायणं—

"न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम्।
सर्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया॥"

इति। नाथवत्यां सीतायामनाथवत् चीरं वसानायां सर्वो जनः प्रचुक्रोश। तथाऽपि धर्मभृतां वरः श्रीरामः क्षिप्रमागम्य सीतायाः चीरं स्वयं बबन्धैव। एवं शोकवस्तुसमवधानेऽपि निःशोकः इत्यनेन गुणद्वितयेनास्य सर्वशक्तित्वमपि स्फोरितम्। तथा च श्रीरामायणेऽञ्जनानन्दनः—

"ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा।
इन्द्रो महेन्द्रस्सुरनायको वा त्रातुं न शक्ता युधि रामवध्यम्॥"

इति। एवं महत्स्वपि सङ्कटेषु अप्रकम्प्यात्मधैर्येणानेन सर्वे लोका नाथवन्तो भवन्ति।

तादृग्गुणनिधिरयं, "अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा।" इत्याद्युक्तरीत्या दिव्यतेजोविशिष्टदिव्यमङ्गलविग्रहत्वात् साक्षादेव इति ज्ञायते। विजिगीषुत्वाच्चायं देवः। तथा च श्रीरामायणम्;—

"अभियाता प्रहर्ता च ... ...
"यदा व्रजति सङ्ग्रामं ग्रामार्थे नगरस्य वा।
गत्वा सौमित्रिसहितो नाविजित्य निवर्तते॥"

इत्यादि। सम्यग्व्यवहर्तृत्वाच्चायं देवः। अत्रापि श्रीरामायणम्;—,'बुद्धिमान्नीतिमान्वाग्मी, बुद्धिमान् मधुराभाषी, पूर्वभाषी प्रियंवदः, उत्तरोत्तरयुक्तौ च वक्ता वाचस्पतिर्यथा"—इत्यादि। निरुपमकान्तिमानिति वा देवः—"सोमवत्प्रियदर्शनः," "चन्द्रकान्तानानं रामं"—इत्यादि श्रीरामायणवचनात्। प्रकृष्टगमनवानिति चायं देवः। अत्रापि श्रीमद्रामायणम्;—"गजसिंहगती वीरौ, मत्तमातङ्गगामिनं,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिंहविक्रान्तगामिनं" — इत्यादि। एवमनेकार्थ 'दिव्' धातु निष्पन्न-देवशब्दविषयत्वेन "दिव्यो देव एको नारायणः" — इति तस्य सृष्टेः प्रागवस्थितिमत्त्वं, तेनाखिलजगन्निदानत्वं, तेन च, — "कारणं तु ध्येयः" — इति सर्वमुमुक्षूपास्यत्वं, तेन च, "समाश्रिताद्ब्रह्मतरो-रनन्तान्निस्संशयो मुक्तिफलप्रपातः॥" — इति मुक्तिप्रदत्वमित्यादि-कमभिव्यज्यते। तथा च कारणत्वाद्याश्रयस्यैव परत्वौचित्यादस्यैव परत्वं सुस्थितम्। निर्धारितं चास्य महादेवादिदुर्ग्रहमाहात्म्यं शिवधनु-र्वृत्तान्तप्रसङ्गे निखिलनिर्जरैः॥

एवमाश्रितसंरक्षणोपयोगिवीर्यधैर्यादिमानयं देवः, "अजायमानो बहुधा विजायते, — इच्छागृहीताभिमतोरुदेहः," "यदा यदा हि धर्मस्य ...। परित्राणाय साधूनाम् ...॥

नष्टधर्मव्यवस्थाता काले काले प्रजाकरः।
उत्पद्यते दस्युवधे शरणागतवत्सलः॥"

इत्यादिप्रमाणैः त्रैलोक्यकण्टकस्य दशवदनस्य मनुष्यैकवध्यस्य वधार्थं तद्दमितदिविषद्भ्यर्थित दाशरथि भावस्सन् सर्वस्मात्परोऽपि, सर्वपिताऽपि,

"ततः पद्मपलाशाक्षः कृत्वाऽऽत्मानं चतुर्विधम्।
पितरं रोचयामास तदा दशरथं नृपम्॥"

इति दशरथगुणस्मरणकृतनयनविकासः सर्वैः स्पृहणीयनयनयुगलः स्वपुत्रं कंचित्पितरमभिललाष! जन्माभिलाषेऽपि दशरथगुणातिरेकेण चतुर्विध-शरीरपरिग्रहमभिलषितवान्। यथा जनिमतो जनिहानिरभिलषिता तथा जनिरहितस्यापि जनिरभिलषिता — दुर्लभं ह्यभिलषितं भवति। "गुणै-र्दशरथोपमः" — इत्याद्युक्तरीत्या जनित्वा आर्जितैः स्वाभाविकैश्च गुणैः स्वसदृशस्य सुतार्थं लालप्यमानस्य अप्रतिहतरथस्य दशरथस्य चरमऋण-विमोचनस्सन् तमेव जन्मभूमित्वेन निश्चितवान्। एवं सर्वस्मात्परोऽपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुरसत्तमैर्नियुक्तः इत्यस्याश्रितपारतंत्र्यमपि व्यक्तं भवति। अखिललोकनिदानभूतः परमात्माऽपि यत्पुत्रतामभ्ययासीत्, स्त्रीजातिषु तस्याः कौसल्यायाः काऽन्या धन्या स्यात्! तद्भाग्यवत्तायां वा किमु वक्तव्यम्! स्तूयते हि भगवदधिष्ठितगर्भा भाग्यवती देवकी देवताभिः।

अथ लोके यस्य कस्यापि वर्णनीयस्यादौ जननं वर्णनीयं, पश्चाद्बाललीला, ततो विद्याभ्यासः, ततस्तत्सामर्थ्यं, ततः परं यौवनारम्भः, ततः पश्चादुद्वाहादिः, ततो राज्यलाभादिरिति कविसमयसिद्धोऽयं क्रमः। तदनुसृत्य जननवैभवाभिवर्णनानन्तरं कौशिकाध्वरगोपनमेव बाललीलात्वेनाभिवर्ण्यते। तथा चोक्तम्, "कौमारकेलिगोपायितकौशिकाध्वर" — इति रघुवीरगद्ये। पश्चाद्विश्वामित्रादस्त्रावाप्तिसमये रणाध्वरधुर्यभव्यदिव्यास्त्रबृन्दवन्दितत्वेन विद्याभ्यासोऽभिव्यज्यते। ततः तनुतरविशिखविताडनविघटितविशरारुशरारुताटकाताटकेयत्वेन तत्सामर्थ्यं, पश्चान्मैथिलनगर सुलोचनालोचन चकोरचन्द्रत्वेन यौवनसंपत्तिः, अनन्तरं मोचितजनकहृदयशङ्कातङ्कतया पाणिग्रहणमङ्गलम् इत्येतत्सर्वं सहृदयहृदयंगमम्।

अथ भगवदवतारस्य साधुपरित्राणार्थतयाऽस्मिन् श्रीरामावतारे किं किं साधुपरित्राणमकरोद्भगवानित्यपेक्षायां, उपस्थितिक्रमेण तावत् कौशिकसवनावनं, ततः गौतमदारपवित्रीकरणं, अनन्तरमनृतभीतपितृवचनपरिपालनमित्यादिकमित्यभिधातुं, प्रथमं कौशिकाध्वरगोपनरूपं साधुपरित्राणमुच्यते। अनन्तरं तस्य दुष्कृन्निरसनमन्तरेणासंभवात् यागविघ्नकरयातुधानवधोपयोगितया बहुविधपरमास्त्रभासुरतां अभिधाय आनुषङ्गिक मारीचादि दुष्कृद्विनाशोऽभिधीयते। तत्र केवलैश्शरैरायोधने "छिन्नं भिन्नं शरैर्दग्धं"— इत्युक्तरीत्या निशितशरशतनिकृत्तै राक्षसशरीरावयवैर्यज्ञभूमिः प्रदूषिता माभूदिति प्रतिभानवान् कौसलेयः मानवे-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नास्त्रेण अतिबलपराक्रममायाधिमारीचं योजनशतात्परतः प्राक्षिपत्पयोधिपूरे। सुबाहुमाग्नेयेन कर्पूरदाहमदहत्। अन्यांश्च वायव्येन वातूलतूलनीत्या दूरोत्सारणपूर्वकं नाशयामास। तनुतरविशिखविताडनमात्रेणैवं कृतं, किमुतास्त्रप्रयोगे। [अत्रेदमपि स्वारस्यमवधेयम्;— श्रीरामावतारः शुक्लपक्षे दिवा नगरेऽभवत्। श्रीकृष्णावतारस्तु कृष्णपक्षे - रात्रौ - वने। एवं श्रीरामकृष्णयोस्सर्वथा भेद एव प्रतीयते। तथापि उभाभ्यामप्यादौ स्त्रीवध एव कृतः। ताटका पूतना चेत्युभे अविद्यारूपे। अनेन लोकरक्षणधुरन्धरैरविद्योन्मुक्तैर्भवितव्यं इति ध्वन्यते। अत्र मारीचः कामः। सुबाहुः क्रोधः। श्रीरामः क्रोधं नाशितवान्। कामं सद्विषये प्रेरयितुं अवशेषितवान्।

"या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतस्सा मे हृदयान्मापसर्पतु॥"

इति श्रीविष्णुपुराणोक्ते. — इति।]

अथ कुमाराणां समावर्तनोचितवयःप्राप्तौ दशरथः निजकुमारानुरूपकन्यापरिचिन्तनव्यग्रोऽभूत्। तदैव स्वकार्यार्थमागतः तादात्विकदशरथभावविशेषाभिज्ञः श्रीरामयाथात्म्यविच्च विश्वामित्रः स्वप्रयोजने निर्वृत्ते सति, अयोनिजात्वेनावतीर्य सीताभिधानेन, "कर्मणैव हि संसिद्धिमास्थिता जनकादयः।" इति श्लाघितजनककुले निवसन्त्या तद्धर्मधर्मिण्या, "रसो वै सः" — इत्यादिश्रुत्या निरतिशयानन्दघनस्य भगवतोऽप्यानन्दकारिण्या श्रिया देव्या मानुषंमन्यं श्रीरामात्मानं परमात्मानं संयोजयितुं मैथिलमखावलोकनव्याजात् तापसजनावेदितवैभवशाम्भवशरासननिशामनकुतूहलिना दाशरथिना सार्धं मिथिलां प्रति गच्छन् सन् मध्येपथं सम्भावितं भागीरथीवृत्तान्तादिकमपि लेशतस्संगृह्णन्, मिथिलोपवने गौतमाश्रमे स्वापचारजनित कोपावेगवशंवद-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पतिशापप्राप्तपाषाणावस्थामहल्यां भगवत्पादारविन्दरजसा पवित्रीचकार। अनेन भगवच्चरणारविन्दपरागस्पर्शस्य समस्तपापप्रतिवन्धकत्वं विज्ञायते। तथा च श्रीमद्भागवते — "यत्पादपङ्कजरजस्नपनं महान्तो वाञ्छन्त्युमापतिरिवात्मतमोपहत्यै।" इति।

"प्रत्यपद्यत चिराय यत्पुनश्चारु गौतमवधूश्शिलामयी।
स्वं वपुस्सकलकिल्विषच्छिदां रामपादरजसामनुग्रहः॥"—
इति महाकविः।

"दुःखे सुखे च रज एव वभूव हेतुस्तादृग्विधे महति गौतमधर्मपत्न्याः। यस्माद्गुणेन रजसा विकृतिं गता सा काकुत्स्थपादरजसा प्रकृतिं प्रपेदे॥"— इति भोजराजः।

"क्षालयामि तव पादपङ्कजे नाथ दारुदृषदोः किमन्तरम्।
मानुषीकरणचूर्णमस्ति ते पादयोरिति कथा प्रथीयसी॥"

"शिला कम्पं धत्ते शिव शिव वियुङ्क्ते कठिनतामहो नारीच्छायामयति वनितारूपमयते। वदत्येवं रामे विहसितमुखी वल्कलमुरःस्थले धृत्वा बध्वा कचभरमुदस्थादृषिवधूः॥",

"पदकमलरजोभिर्मुक्तपाषाणदेहामलभत यदहल्यां गौतमो धर्मपत्नीं। त्वयि चरति विशीर्णप्राण्णि विन्ध्याद्रिपादे कति कति भवितारस्तापसा दारवन्तः॥"– इत्यादीन्यपि प्रमाणान्यत्रानुसन्धेयानि।

अथ श्रीराघवस्यायोध्यातो निर्गमनादारभ्य आमिथिलाप्रवेशं मध्येपथं तेषु तेषु स्थानेषु प्रसक्ता प्रथिताः नवविविधकथाः कौशिकमुनिभिः कथिताः। कथानां नवत्वं नाम इतःपूर्वं अश्रूयमाणत्वम्, प्राधान्येन नवसु स्थलेषु सम्भूतत्वं च। तथाहि —

१. अङ्गविषये स्थाण्वाश्रमे कन्दर्पदाहकथा।

२. अनन्तरं गङ्गातरणसमये सरयूकथा।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३. ततः सुत्राम्णो वृत्रवधजनितब्रह्महत्यादिविमोचनस्थाने मलदकरूशाख्याने देशे सुकेतुतनयायास्ताटकाभिधानाया यक्षिण्यास्सपुत्रायाः अगस्त्यापराधात् राक्षसभावप्राप्त्यादिकथा ।

४. पश्चात् सिद्धाश्रमे श्री वामनावतारे महाबलिनियमनादिकथा ।

५. अनन्तरं सिद्धाश्रमात् मिथिलां प्रति प्रस्थानसमये जनकगृहपूजितधनुश्श्रेष्ठकथा ।

६. पुनश्शोणाकूले कौशिकेन स्ववंश्यकथा ।

७. अथ गङ्गातीरे भागीरथ्याः, तत्प्रसंगात् पार्वतीगुहोत्पत्त्यादेः सगरपुत्राणां च कथा ।

८. अतः जाह्नवीतरणानन्तरं विशालायां नगर्यां क्षीराब्धिमथनादेः दितितपस्यादेः तत्पुरीनाथस्य सुमतिनामकैक्ष्वाकस्य राज्ञश्च कथा ।

९. ततः परं गौतमाश्रमे अहल्याशापविमोचनादिकथा—इत्येवंप्रकारेण तत्र तत्र कौशिकोदितकथाभिः यथेममपरिचितवनचारं कुसुमपातासहसुकुमारशरीरतया वातातपादिक्लेशलेशसहत्वकथाविदूरं सदा सुखोचितं श्रीराघवं गहनतरवनगमनादिखेदः सूक्ष्ममपि नाभिभवेत्, तथा अभिरमितः ।

"कथाभिरभिरामाभिरभिरामौ नृपात्मजौ ।
रमयामास धर्मात्मा कौशिको मुनिपुङ्गवः ॥"

इति श्रीरामायणम् । आह च महाकविः—

पूर्ववृत्तकथितैः पुराविदस्सानुजः पितृसखस्य राघवः ।
उह्यमान इव वाहनोचितः पादचारमपि न व्यभावयत् ॥"—इति ।

अथ मिथिलाप्रवेशे "विपुलांसो महाबाहुः", "महोरस्को

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महेष्वासौ ...," "आजानुबाहुस्सुशिराः ..., समस्समविभक्ताङ्गः, गजसिंहगती वीरौ - पद्मपत्रविशालाक्षौ - अश्विनाविव रूपेण - राममिन्दीवरश्यामं, चन्द्रकान्तानानं रामं" – इत्याद्युक्तरीत्या निरुपमरूपलावण्यसौन्दर्यादिनिधेः, अत एव "रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम्" इति पुंसामपि मनोनयनसंवननस्य श्रीरघुनन्दनस्य साक्षात्कारेण मिथिलापुरवास्तव्यानां कामिनीजनानां समुत्पन्ननयनानन्दप्रकारः वाचामगोचरः। तत्सुलोचनालोचनचकोराणां चन्द्रः खलु सः।

"न हि तस्मान्मनः कश्चिच्चक्षुषी वा नरोत्तमात्।
नरश्शक्नोत्यपाकृष्टुं अतिक्रान्तेऽपि राघवे ॥

यश्च रामं न पश्येत्तु यं च रामो न पश्यति।
निन्दितस्स वसेल्लोके स्वात्माप्येनं विगर्हते ॥"—

इति रूपेणाप्रतिरूपेण पुंसामप्येवंभूतत्वे स्त्रीणां किमुत! किं च,

"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।
विरूपाक्षस्य जयिनीस्तास्तुवे वामलोचनाः ॥"

इत्युक्तरीत्या यैर्विलोचनैस्त्रिलोकीमपि वशीकुर्वन्ति वनिताः तान्येव लोचनानि तास्मिन् श्रीरामे किङ्करीभूतान्यहो तस्य गुणातिशयः!

एवं मिथिलाप्रवेशानन्तरं तत्र जनककुले अतुलबलैः पञ्चसहस्रेणापि पुरुषैः अष्टचक्रमंजूषायां प्रयत्नेन महीयसा आनीतस्य सकलसुरासुरादिदुरानमस्यापि खण्डपरशुकोदण्डप्रकाण्डस्यानायासेन खण्डनात् अस्यावतारदशायामप्यखिललोकातिशायि भुजबलादिसंपदिति निश्चीयते। विश्वामित्रेण सह विदेहनगरवीथीषु दरदलदमलनीलोत्पलदलश्यामे रामे नयनपदवीमागतवति सति,

"भूयो भूयस्सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साक्षात्कामं नवमिव रतिर्मालती माधवं सा
गाढोत्कण्ठा ललितललितैरङ्गकैस्ताम्यतीति ॥"

इतिवत् तुङ्गवातायनस्था जानकी तं दृष्ट्वा गाढोत्कण्ठा भूत्वा "राघवः मम भर्ता भवेत्किम्"?

"कमठपृष्ठकठोरमिदं धनुर्मधुरमूर्तिरसौ रघुनन्दनः ।
कथमधिज्यमनेन विधीयते ह्यहह तातपणस्त्वतिदारुणः ॥"

इत्युक्तरीत्या चिन्तयन्त्यां च तस्यां,

"रामो दूर्वादलश्यामो जानकी कानकी लता ।
अनयोर्योग्य उद्वाहः धनुरेशं पणो महान् ॥"

इति सख्यामपि व्यथितायां, तद्व्यसनं निराकुर्वन् राघवोऽपि,

"उपप्राकाराग्रं प्रहिणु नयने तर्कय मनाक्
अनाकाशे कोऽयं गलितहरिणश्शीतकिरणः ॥"

इति प्रासादस्थितायाः निरतिशयकीर्त्याचारप्रधानजनकराजपुत्र्याः अकलंक-चन्द्रसदृशं मुखं वीक्ष्य तन्नयनसौन्दर्यपरवशः धनुर्भंगं विना तदुद्वाहा-संभवं मन्वानः तद्विवाहार्थं लीलया धनुर्भंगं कृतवान् खलु ।

नन्विदमुक्तरीत्या सकलसुरासुरदुराधर्षस्य शार्वस्य धनुर्वरस्य,

"बालो द्वादशवर्षोऽयं अकृतास्त्रश्च राघवः ।
ऊनषोडशवर्षो मे रामो राजीवलोचनः ॥"

इत्युक्तरीत्या बालेन मनुजमात्रेण रामेण कथं लीलया ग्रहणानमनपूरण-भञ्जनादिकं विधातुं शक्येतेति चेन्मैवं; "अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी ।" -- इत्यन्तरादित्यविद्योदित-पुण्डरीकाक्षत्वलिंगेन तस्य परमपुरुषश्रीनारायणरूपत्वात् किमशक्यम्? परन्तु, "इच्छात एव तव विश्वपदार्थसत्ता," -- इतीच्छामात्रादपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वं संपादयितुं समर्थत्वात् तदिदमीषत्करमेव। तदिदमनुभूयते श्रीमद्वेदान्तगुरुशेखरैः – "चण्डकरकिरणमण्डलबोधितपुण्डरीकवनरुचिलुण्टाकलोचन" इति। ननु हरधनुर्भंगेन दृष्टवीर्याय दाशरथये वीर्यशुल्कायास्सीतायाः प्रदेयत्वेऽपि, "रूपमिच्छति कन्यका", "कन्या वरयते रूपम्", – इत्यादिनीत्या सामान्यतः कन्याजनमात्रेण वरणीयस्य रूपस्याभावे सति,

"जनकस्य कुले जाता देवमायेव निर्मिता।
सर्वलक्षणसंपन्ना नारीणामुत्तमा वधूः॥
देवताभिस्समा रूपे सीता श्रीरिव रूपिणी।

तरुणी रूपसम्पन्ना, श्यामा समविभक्तांगी, स्त्रीरत्नं रत्नभूषिता, नैव देवी न गन्धर्वी नाप्सरा न च दानवी। तुल्या सीमन्तिनी तस्य मानुषीषु कुतो भवेत्॥" –इत्याद्युक्तरीत्या विशेषतः निरुपमरूपलावण्यसौन्दर्यादिनिधिस्सीताऽस्मै कथंकारं प्रतिपाद्यतां नाम? – इति चेत्, "तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी" – इति श्रुतिप्रत्यभिज्ञापकेनास्यौपनिषदपुरुषत्वाभिव्यञ्जनात् सर्वमप्यस्मिन् संभाव्यते इत्यभिप्रयन्त आहुश्श्रीमदाचार्यपादाः – "चण्डकरकिरणमण्डलबोधितपुण्डरीकवनरुचिलुण्टाकलोचन॥" – इति। तथा चास्य लोचनश्रीरेवालमखिललोकसंवननाय। किमन्येन रूपविचिन्तनेन? नयनसौन्दर्यमेव हि लावण्यपरा काष्ठा। अतः रूपादिभिरपि सीतानुरूप्यात् युक्तरूपमस्मै पुत्रीप्रदानमिति जनकाभिसन्धिः।

सीताया वीर्यशुल्कत्वेन स्थापितत्वात्, अखिलावनीतलवर्तिनां वीर्यवतामपि सर्वेषां राजकुमाराणां वीर्यं शङ्करधनुरनारोपणेनात्यल्पमिति प्रत्याख्यातत्वाच्च, कथं ममेयं प्रतिज्ञा सत्या स्यात्, कथं वाऽहममुष्माद्धर्मसङ्कटान्मुच्येयमित्येवंरूपशङ्कातङ्कात् जनकराजः तादृश-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शङ्करशरासनभञ्जनेन श्रीरघुनन्दनेन मोचितः । तथा च जनकवचनम् ;—

"भगवन् दृष्टवीर्यो मे रामो दशरथात्मजः ।
अत्यद्भुतमचिन्त्यं च न तर्कितमिदं मया ॥

जनकानां कुले कीर्तिमाहरिष्यति मे सुता ।
सीता भर्तारमासाद्य रामं दशरथात्मजम् ॥

मम सत्या प्रतिज्ञा च वीर्यशुल्केति कौशिक ।" इति ।

भगवान् वाल्मीकिश्चाह — "राजा विगतसाध्वसः" इति । तद्धनुर्वर-प्रभेदेन प्रकाशितलोकोत्तरमहिममहनीयस्य श्रीरामचन्द्रकरारविन्दस्य इदमेव साधीयः फलं यत् ततोऽप्यतिशयितकाठिन्यवन्मैथिलीस्तनकलशविहरण-भागधेयपरिपाकलाभः! विशालरमणीये हि स्थले क्रीडा चेतोहारिणी ।

अथास्य शतकोटिशतगुणकठिनपरशुधरमुनिवरकरधृतदुरवनमतम-निजधनुराकर्षणेनापि प्रागुक्तं पारमेष्ठ्यं प्रकाश्यते । तथा च श्री परशुराम-वचनम् —

"अक्षयं मधुहन्तारं जानामि त्वां सुरेश्वरम् ।
धनुषोऽस्य परामर्शात् स्वस्ति तेऽस्तु परन्तप ॥"

एते सुरगणास्सर्वे निरीक्षन्ते समागताः ।
त्वामप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे ॥" — इत्यादि ।

कैलासकम्पनख्यातभुजबलो यः सकलसुरासुरजेतारं त्रिलोकनेतारं महेन्द्रमपि रणाजिरे जिगाय, सोऽपि दशवदनः पशुवत् बद्धः यस्य कारागारमाप्रसादमध्युवास, तमपि सहस्रबाहुं कार्तवीर्यार्जुनं योऽय-मनीनयत्सान्वयं निजपरश्वथामिषतां, ब्राह्मणोऽयमिति करुणया विश्वामित्र-कृतेन सन्तोषेण च तस्य सुगतिमात्रविहतिकरशरवरप्रभावस्य श्री राघवस्य महिमातिशयः वाचामगोचर इति किमु वक्तव्यम् । यद्भार्गवः रघूद्वहगतौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षणमन्तरायं कृत्वा परगतेर्विहतिं प्रपेदे तन्महति पुरुषे प्रयुक्तमागः तदनुरूपफलं प्रसूते इति नूनम् ॥

इति श्रीबालकाण्डार्थसंग्रहः समाप्तः ॥

अथ अयोध्याकाण्डार्थसंग्रहः ॥

अथ तदवतारप्रयोजनं धर्मसंस्थापनं चिकीर्षोः श्रीरामस्य,

"स तु श्रेष्ठगुणैर्युक्तः प्रजानां पार्थिवात्मजः ।
बहिश्चर इव प्राणो बभूव गुणतः प्रियः ॥
स्त्रियो वृद्धास्तरुण्यश्च सायं प्रातस्समाहिताः ।
सर्वान्देवान्नमस्यन्ति रामस्यार्थे यशस्विनः ॥"

इति प्रकृतिसंवननसकलकल्याणगुणगणतया,

"इच्छामो हि महाबाहुं रघुवीरं महाबलम् ।
गजेन महताऽऽयान्तं रामं छत्रावृताननम् ॥"

इति प्रकृतिप्रार्थनया राज्ञा यौवराज्याभिषेको निश्चितः ।

"ततः पौरजनस्सर्वश्श्रुत्वा रामाभिषेचनम् ।
प्रभातां रजनीं दृष्ट्वा चक्रे शोभयितुं पुरीम् ॥"

इत्याद्युक्तरीत्या पौराः प्रहर्षात्पुरालङ्करणे च प्रवृत्ताः । तदवेक्ष्य विज्ञात-वृत्तान्तया मन्थरया,

"उत्तिष्ठ मूढे किं शेषे भयं त्वामभिवर्तते" — इत्यारभ्य

"सुभगा खलु कौसल्या यस्याः पुत्रोऽभिषेक्ष्यते ।
यौवराज्येन महता श्वः पुष्येण द्विजोत्तमैः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राप्तां सुमहतीं प्रीतिं प्रतीतां तां हतद्विषम ।
उपस्थास्यसि कौसल्यां दासीवत्त्वं कृतांजलिः ॥"

इत्यादिवचननिचयविक्षोभितहृदयाऽभवत् कैकेयी । अतस्सा

"अद्य राममितः क्षिप्रं वनं प्रस्थापयाम्यहं ।
यौवराज्ये च भरतं क्षिप्रमेवाभिषेचये ॥" — इति प्रतिज्ञाय,

"ततः परमुवाचेदं वरदं काममोहितम् ।
वरौ यौ मे त्वया देव तदा दत्तौ महीपते ॥
तौ तावदहमद्यैव वक्ष्यामि शृणु मे वचः ॥
अभिषेकसमारम्भो राघवस्योपकल्पितः ।
अनेनैवाभिषेकेण भरतो मेऽभिषिच्यताम् ॥
यो द्वितीयो वरो देव दत्तः प्रीतेन मे त्वया ।
तदा दैवासुरे युद्धे तस्य कालोऽयमागतः ॥
नव पञ्च च वर्षाणि दण्डकारण्यमाश्रितः ।
चीराजिनजटाधारी रामो भवतु तापसः ॥"

इति वरद्वयव्याजेन रामप्रव्राजनमावेद्य,

"सत्यमेकपदं ब्रह्म सत्ये धर्मः प्रतिष्ठितः ।
सत्यमेवाक्षया वेदास्सत्येनैवाप्यते परम् ॥
सत्यं समनुवर्तस्व यदि सत्ये धृता मतिः ।
स वरस्सफलो मेऽस्तु वरदो ह्यसि सत्तम ॥
धर्मस्येहाभिकामार्थं मम चैवाभिचोदनात् ।
प्रव्राजय सुतं रामं त्रिः खलु त्वां ब्रवीम्यहम् ॥
समयं च ममाद्येमं यदि त्वं न करिष्यसि ।
अग्रतस्ते परित्यक्ता परित्यक्ष्यामि जीवितम् ॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति तदकरणे स्वमरणप्रतिज्ञापूर्वकं पतिं निर्बबन्ध। अनेन पितरि दशरथे च, "नाशकत्पाशमुन्मोक्तुं बलिरिन्द्रकृतं यथा"। इति धर्मपाशसंयते इतिकर्तव्यतामूढे विह्वले सति,

"भरतस्त्वभिषिच्येत यदेतदभिषेचनम्।
त्वदर्थे विहितं राज्ञा तेन सर्वेण राघव॥
सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः।
अभिषेकमिदं त्यक्त्वा जटाजिनधरो वस॥"

इति मातुस्सपत्न्याः कैकेय्या व्याहृतमेव निजपितृनिदेशमाकलय्य,

"दण्डकारण्यमेषोऽहं इतो गच्छामि सत्वरः।
अविचार्य पितुर्वाक्यं समा वस्तुं चतुर्दश॥"

इति यौवराज्यं परित्यज्य दण्डकारण्यगमनेन, युक्तमयुक्तं वा गुरुवचनमवश्यं वश्येन पुत्रेण विधेयं इति परमं धर्मम्, 'यद्यदाचरति श्रेष्ठः', 'राज्ञि धर्मिणि धर्मिष्ठाः' इति शास्त्रात् कल्याणगुणाम्बुधिर्दाशरथिः स्वानुष्ठानेन स्थापयामास।

"दुरितैरपि कर्तुमात्मसात् प्रयतन्ते नृपसूनवो हि यत्"।
इति न्यायेन यद्राज्यं राजपुत्राः विषप्रयोगादिनिषिद्धोपायैरपि स्वयमात्मसात्कर्तुं प्रयतन्ते, तदेव राज्यमयं गुणाकरो रामः पित्रा प्रकृत्यनुमतेन प्रदत्तमपि मात्रा सपत्न्या वञ्चितः तमेनमसत्यवचनान्मोचयितुमहृद्यवदवमेने; यतस्तदलाभप्रयुक्तश्शारीरो मानसो वा विकारोऽस्य नाभवत्। यथोक्तं श्रीरामायणे —

"न चास्य महतीं लक्ष्मीं राज्यनाशोऽपकर्षति।
लोककान्तस्य कान्तत्वात् शीतरश्मेरिव क्षपा॥
न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम्।
सर्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया॥"— इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"दधतो मङ्गलक्षौमे वसानस्य च वल्कले ।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥

पित्रा दत्तां रुद्रनामः प्राञ्जलीं प्रत्यपद्यत ।
पश्चाद्वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत् ॥"

इत्यादिमहाकविवचनं चात्रानुसन्धेयम् । एतेन वृत्त्यन्तरोक्तमेव महाधीरत्वं सहृदयहारिणा व्यञ्जनाव्यापारेण चमत्कारितां नीतम् ।

"यथा किंचित्किंचित्पवनचलचेलांचलतया
कुचद्वन्द्वं कान्तिं किरति न तथोद्घाटितमुरः ॥"

इति कामिनीकुचकलशवत् गूढस्यैव चमत्कारित्वात् ।

ननु — "को न्वस्मिन् सांप्रतं लोके गुणवान् कश्च वीर्यवान्"— इत्यत्र गुणवच्छब्देन गुण्यते आवर्त्यते पुनः पुनरनुसन्धीयते इति गुणः सौशील्यं; तच्च महीयसोऽपि नितान्तहीनेष्वनन्यप्रयोजनतया नीरन्ध्रसंश्लेषस्वभावत्वं — तद्वान् गुणवान् — तादृशसौशील्यवान् कः इति वाल्मीकिना पृष्टे सति, तदुत्तरस्य, "इक्ष्वाकुवंशप्रभवो रामो नाम जनैश्श्रुतः ॥" इत्यत्र सन्निहितव्यवहितपण्डितपामरनिर्विशेषं जनमात्रविदितत्वोक्त्या उक्तप्रायत्वेऽपि तादृशं सौशील्यं कदा कुत्र वा प्राकाशि श्रीरामचन्द्रेणेति शङ्कायां,

"ततो निषादाधिपतिं दृष्ट्वा दूरादुपस्थितम् ।
सह सौमित्रिणा रामस्समागच्छद्गुहेन सः ॥

तमार्तस्संपरिष्वज्य गुहो वचनमब्रवीत् ।
यथाऽयोध्या तथेयं ते राम किं करवाणि ते ॥

भुजाभ्यां साधु पीनाभ्यां पीडयन् वाक्यमब्रवीत् ।
दिष्ट्या त्वां गुह पश्यामि अरोगं सह बान्धवैः ॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्याद्युक्तरीत्या सर्वलोकसंमान्यसवितृकुलप्रसूतेन भगवता श्रीरामेण जात्यादिभिर्निर्हीने निषादे स्वात्मनाऽत्यन्तसदृशपुरुषविशेषविधेयेन सौहृदेन नीरन्ध्रसहवाससल्लापसंश्लेषादिविधानादेतत् सम्यक्प्राकाशीत्यवधेयम्। एवं गृध्रराज - शबरी - वृत्तान्तादावपि बोध्यम्।

अथ श्रीरामः पितृवचनपालनार्थं वनाय प्रस्थाय तस्मिन् दिने रात्रिं गुहसमीपे यापयित्वा परेद्युः प्रातः गुहेन भागीरथीं तारितस्य गंगायमुनासंगमे पुण्ये प्रयागे प्रथिततरतपोमहिममहनीयं मुनितल्लजं भरद्वाजं प्रणनाम। तन्निकटे रात्रिमुषित्वा प्रभाते तेन महर्षिणा कृताशीर्वचनस्य तदुपदिष्टेन पथा अतिमात्रसुभगचित्रकूटगिरिवरकटकतटेषु सुलक्ष्मणलक्ष्मणवरिवसितस्य सीतासखस्य श्रीरामस्य चित्रकूटः द्रष्टृजनानां विस्मयावहशृङ्गसमृद्धिसंपन्नतया सुसमृद्धपुष्पफलतरुलतादियुततया कलरवमृगपक्षिसंपूर्णतया तापसजनासेवितप्रत्यासन्नशुभजलनदीरमणीयतया चात्यन्तं निवाससमुचित इति भाति।

"रम्यमावसथं कृत्वा रममाणा वने त्रयः।
देवगन्धर्वसंकाशास्तत्र ते न्यवसन् सुखम्॥"

इत्यनेन राज्यनाशवनवासप्रयुक्तः दुःखलेशोऽपि ससीतस्य सानुजस्य रामस्य नाभवत्। परन्तु राज्यलाभान्तःपुरवासादिप्रयुक्तसन्तोषादप्यतिशयितसन्तोषविशेष एवाभूदिति व्यज्यते। तथा च रामायणं —

"सुरम्यमासाद्य तु चित्रकूटं नदीं च तां माल्यवतीं सुतीर्थाम्।
ननन्द हृष्टो मृगपक्षिजुष्टं जहौ च दुःखं पुरविप्रवासात्॥"

इति। श्रीरामवचनं च —

"न राज्याद्भ्रंशनं भद्रे न सुहृद्भिर्विना भवः।
मनो मे बाधते दृष्ट्वा रमणीयमिमं गिरिम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नायोध्यायै न राज्याय स्पृहयेऽद्य त्वया सह ।
यदीह शरदोऽनेकास्त्वया सार्धमनिन्दिते ।
लक्ष्मणेन प्रवत्स्यामि न मां शोकः प्रधक्ष्यति ॥" – इत्यादि ।

एवं भरद्वाजशासनपरिगृहीत चित्रकूटगिरिकटकतटरम्यावसथत्वेन न केवलं निषादराजसौहृदसूचितसौशील्यसागरः किं तु सौलभ्यनिधिरप्यय-मित्यवगम्यते – महनीयाज्ञानुवर्तित्वरूपधार्मिकगुणोऽपि ध्वनितः ।

एवं श्रीरामस्य चित्रकूटस्थित्यनन्तरं पुनः रामाह्वानशङ्कया गुह-समीपे कतिचिद्दिनानि स्थित्वा चारविदितरामभरद्वाजाभिगमनचित्रकूटा-वस्थानादिवृत्तान्तस्सुमन्त्रः अयोध्यां प्रस्थितः । तेन निवेदितोदन्ते राज्ञि दशरथे —

"विषये ते महाराज रामव्यसनकर्शिताः ।
अपि वृक्षाः परिम्लानाः सपुष्पाङ्कुरकोरकाः ॥
उपतप्तोदका नद्यः पल्वलानि सरांसि च ।
परिशुष्कपलाशानि वनान्युपवनानि च ॥"

इत्याद्युक्तरीत्या अचेतनानामप्यतिशयितक्लेशावहरामविरहासहतया "हा राघव महाबाहो हा ममायासनाशन ।"– इति रामैकमनस्के देवभूयं प्राप्ते, प्रातरमात्यैर्वसिष्ठानुमत्या मातुलगृहादानीतः विदितवृत्तान्तः पितु-र्विहितौर्ध्वदैहिकः भरतः,

"मातृरूपे ममामित्रे नृशंसे राज्यकामुके ।
न तेऽहमभिभाष्योऽस्मि दुर्वृत्ते पतिघातिनि ॥"

इत्यादिवाक्यगणैर्मातरं धिक्कृत्य,

"राममेवानुगच्छामि राजा स द्विपदां वरः ।
त्रयाणामपि लोकानां राज्यमर्हति राघवः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदि त्वार्यं न शक्ष्यामि विनिवर्तयितुं वनात् ।
वने तत्रैव वत्स्यामि यथाऽऽर्यो लक्ष्मणस्तथा ॥
सर्वोपायं तु वर्तिष्ये विनिवर्तयितुं बलात् ।
समक्षमार्यमिश्राणां साधूनां गुणवर्तिनाम् ॥"

इति प्रतिज्ञाय स्वयमपि जटाचीराणि धृत्वा वने राममन्विष्य,

"तं दृष्ट्वा भरतश्श्रीमान् दुःखशोकपरिप्लुतः ।
अभ्यधावत धर्मात्मा ... ... ॥"

इति राममभिधाय

"पादावप्राप्य रामस्य पपात भरतो रुदन् ॥"

इति तत्पादयोः पतित्वा,

"इदं निखिलमव्यग्रं राज्यं निहतकंटकम् ।
अनुशाधि स्वधर्मेण धर्मज्ञ सह बान्धवैः ॥
शिरसा त्वभियाचेऽहं कुरुष्व करुणां मयि ।
अथैतत्पृष्ठतः कृत्वा वनमेव भवानितः ।
गमिष्यसि गमिष्यामि भवता सार्धमप्यहम् ॥"

इति साकेतराज्याभ्युपगमाय तं प्रार्थयामास । तथाऽपि तदनंगीकुर्वाणं राममालोक्य,

"इह मे स्थण्डिले शीघ्रं दर्भानास्तर सारथे ।
आर्यं प्रत्युपवेक्ष्यामि यावन्मे न प्रसीदति ॥
अनाहारो निरालोको धनहीनो यथा द्विजः ।
शेष्ये पुरस्ताच्छालाया यावन्न प्रतियास्यति ॥"

इति प्रतिविधाय पौनःपुन्येन निर्बबन्ध । तथाऽपि,

"तमङ्के भरतं कृत्वा रामो वचनमब्रवीत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान्वा हिमं त्यजेत् ।
अतीयात्सागरो वेलां न प्रतिज्ञामहं पितुः ॥"

इति रामस्य दृढप्रतिज्ञतामवबुध्य वसिष्ठानुमत्या पुनर्भरतः,

"अधिरोहार्य पादाभ्यां पादुके हेमभूषिते ।
एते हि सर्वलोकस्य योगक्षेमं विधास्यतः ॥"

इति सकललोकयोगक्षेमाय पादुके श्रीरामचन्द्रचरणारविन्दसंबन्धधन्ये प्रार्थितवान् । तदभ्युपेत्य,

"सोऽधिरुह्य नरव्याघ्रः पादुके ह्यवरुह्य च ।
प्रायच्छत्सुमहातेजाः भरताय महात्मने ॥"

इति भरताय प्रतिपादिताभ्यां स्वप्रतिनिधिभूताभ्यां पादुकाभ्यां पितुर्निदेशमपरित्यजत एव श्रीरामस्य सकललोकयोगक्षेमावहत्वं प्रतिपाद्यते । ततः पूर्वं श्रीराघवप्रत्यानयनार्थं,

"साधु राघव माभूत्ते बुद्धिरेवं निरर्थिका ।
प्राकृतस्य नरस्येव ह्यार्यबुद्धेर्मनस्विनः ॥
कः कस्य पुरुषो बन्धुः किमाप्यं कस्य केनचित् ।
यदेको जायते जन्तुरेक एव विनश्यति ॥
तस्मान्माता पिता चेति राम सज्जेत यो नरः ।
उन्मत्त इव स ज्ञेयो नास्ति कश्चिद्धि कस्यचित् ॥"

इत्याद्यैर्जाबालिप्रोक्तैर्वचननिचयैरस्याप्रकम्प्यत्वम्, "न तत्समश्चाभ्यधिकश्च दृश्यते", "न तस्येशे कश्चन", "एकश्शास्ता न द्वितीयोऽस्ति शास्ता" इत्यादिप्रमाणगणैस्तस्यानन्यशासनीयत्वात् कैमुतिकन्यायासिद्धम् । युक्तविषयेऽपि योऽन्यैर्न शास्यते किमुतात्यन्तायुक्तविषये । तथा च भरद्वाजशासनानुवर्तनादयस्सर्वेऽपि व्यापाराः भूष्णुभिरेवं वर्तितव्यं नैवं वर्तितव्यं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति स्वानुष्ठानमुखेन लोकनिदर्शनार्थाः । अर्थतः उदाहृतश्रुतिप्रत्याभिज्ञापकेनाप्यस्य सर्वेश्वरत्वं प्राकाशि ।

अथ लोके हि कश्चिदनिवार्यकार्यवशात् स्वनिर्वहणीयं कार्यजातं स्वस्मादप्यतिशयितसामर्थ्यवता पुरुषविशेषेण निर्वहति । अयन्तु न तथा । किन्तु अचेतनाभ्यामपि पादुकाभ्यां योगक्षेमावहः, तत्रापि यस्य कस्यापि न, अपि तु लोकस्य, तत्रापि निखिलस्येत्यहो तस्य महिमातिशयः, येन भरतशरणागतिरपि सफलीकृता ।

ननु कथमचेतनयोः पादुकयो राज्यतन्त्रकरणनैपुणी, तस्यातिशयितधिषणधिषणचेतनधर्मत्वादिति चेत्, श्रीरामपादाम्बुजस्पर्शप्रभावादिति ब्रूमः । तादृशः खलु भगवच्चरणारविंदसंबन्धमहिमातिशयः यदचेतनानामपि चेतनविशेषीकरणम् । तथा हि यत्स्पर्शाच्छिलाऽपि श्रीरिव रूपिणी रमणी बभूव, अङ्गारोऽपि मूर्त इव मारः कुमारोऽभवत् । अत एव श्रीरामायणे, "एते हि सर्वलोकस्य योगक्षेमं विधास्यतः, योगक्षेमावहे चेमे, आभ्यां राज्ये स्थितो धर्मः",

"तदा हि यत्कार्यमुपैति किंचिदुपायनं चोपहृतं यथार्हम् ।
स पादुकाभ्यां प्रथमं निवेद्य चकार पश्चाद्भरतो यथावत् ॥"

"छत्रं धारयत क्षिप्रं आर्यपादाविमौ मतौ ॥" इत्याद्युक्तम् । न चैतेषु वचनेषु तयोर्योगक्षेमावहत्वमौपचारिकं, शब्दस्वारस्यभङ्गापत्तेः । न च प्रमाणान्तरविरोधात् तदभ्युपेयत इति वाच्यम्, तत्रापि प्रमाणान्तरेण तत्सिद्धेः । अत एव हि श्रीपाद्मे, "ज्ञात्वा तदाज्ञां ताभ्यां च भरतः क्षितिमन्वशात् ॥" इति व्यक्तमुक्तमिति दिक् । "प्रणतभरतमकुटतटघटितपादुकाग्र्याभिषेकनिर्वर्तितसर्वलोकयोगक्षेम", — इति श्रीमत्कविकथकसिंहगुरवः । अत्र,

"यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिरसा धारयिष्यामि न मे शान्तिर्भविष्यति ॥"

इति प्रार्थितवतो भरतस्य शिरसा श्रीरामपादुकाधारणमेव स्वानुगुणमणि-मकुटधारणमभवदिति व्यज्यते। तथा च श्रीमत्पादुकासहस्रे –

"वाक्ये गरीयसि पितुर्विहितेऽप्यतृप्त्या
मातुर्मनोरथमशेषमवन्ध्ययिष्यन् ।
मन्ये तदा रघुपतिर्भरतस्य तेने
मातस्त्वयैव मणिमौलिनिवेशलक्ष्मीम् ॥" इति ।

"अवन्ध्ययन्ती भरतप्रपत्तिं रामप्रतिज्ञामपि निर्वहन्ती ।
याऽगादयोध्यां विबुधाभिवन्द्यां तां पादुकां नौमि रघूद्वहस्य ॥"

इत्यभियुक्तवचनं चात्र भाव्यम् ।

अथ श्रीमत्सुन्दरकाण्डे प्रत्यभिज्ञानप्रदानावसरे पवनतनयाय श्री-सीतोदितातिरहस्यभूतकाकासुरवृत्तान्तेनाप्यस्य सर्वशक्तित्वं सर्वेश्वरत्वं च द्रढीक्रियते। "शैलस्य चित्रकूटस्य पादे पूर्वोत्तरे पुरा"–इति चित्र-कूटावस्थितिकालिकत्वावगमात्, श्रीपाद्मे अस्मिन्नेव प्रकरणे व्यक्तमुक्तत्वाच्च तद्वृत्तान्तोऽत्रैव संग्रहीतुमुचितः। तथा च श्रीपाद्मे –

"ऐन्द्रः काकस्समागम्य जानकीं वीक्ष्य कामुकः ।
विददार नखैस्तीक्ष्णैः पीनोन्नतपयोधरम् ॥"

इति। तथा चायं सीतादेव्यां अभिलाषाद्वायसरूपं धृत्वा मांसभक्षार्थंवि स्तनान्तरे विददारेति भावः। अत्र जयन्त इति प्रसिद्ध इन्द्रपुत्र एव वायसरूपेणागत इति केचिदाहुः। वायसरूप एवापरः पुत्रः इत्यपरे। एवं कृतागसस्तस्य वधार्थं प्रयुक्तस्य ब्रह्मास्त्रमन्त्राभिमन्त्रितस्य संस्तरदर्भ-खण्डस्य परिपतनभयेन चकितैस्सकलसुरमुनिभिः "अहो अस्यास्त्रप्रभावः यत्सत्यं प्रयोक्तृविशेषेण ब्रह्माद्यस्त्राणामप्युत्कर्षातिशयः, यदिदं महास्त्रं, वयं यद्येतल्लक्ष्यं रक्षितुमुद्युक्ष्महि तदाऽस्मानप्यनुद्रुत्य बाधते; यदि विहातुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदाऽस्मान्विसृज्य वायसमेव सन्तापयदनुधावति । नैतादृशं कापि दृष्ट-चरमिति प्रशंसितं ह्यस्य महास्त्रसामर्थ्यम् । अत्र श्रीरामायणं –"इदं श्रेष्ठमभिज्ञानं ब्रूया ..." इत्यारभ्य,

"स पित्रा च परित्यक्तस्सुरैश्च समहर्षिभिः ।
त्रीन् लोकान् संपरिक्रम्य तमेव शरणं गतः ॥

स तं निपतितं भूमौ शरण्यश्शरणागतम् ।
वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ॥

स रामाय नमः कृत्वा राज्ञे दशरथाय च ।
विसृष्टस्तेन वीरेण प्रतिपेदे स्वमालयम् ॥" इत्यन्तम् ।

राघवश्चित्रकूटाद्रौ सानुजोऽरमत स्त्रिया ।
कदाचिदङ्के वैदेह्या निद्राणे रघुनन्दने ॥

ऐन्द्रः काकस्समागम्य जानकीं वीक्ष्य कामुकः ।
विददार ... ... ॥

तद्दृष्ट्वा राघवः क्रुद्धः कुशं जग्राह पाणिना ।
ब्राह्मेणास्त्रेण संयोज्य चिक्षेप ध्वांक्षमारणे ॥

तं दृष्ट्वा घोरसंकाशं ज्वलत्कालानलोपमम् ॥" – इत्यारभ्य,

"इत्युक्तस्सोऽथ बलिभुक् ब्रह्मणा रघुनन्दनम् ।
उपेत्य सहसा भूमौ निपपात भयातुरः ॥

प्राणसंशयमापन्नं दृष्ट्वा सीता तु वायसम् ।
त्राहि त्राहीति भर्तारमुवाच दयिता विभुम् ॥

तच्छिरः पादयोस्तस्य युयुजे चाथ जानकी ।
समुत्थाप्य करेणाथ कृपापीयूषसागरः ॥

ररक्षासौ निजास्त्राय तदेकाक्षि ददौ तदा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वायसोऽपि मुहुर्नत्वा सीतायै राघवाय च ।
स्वर्लोकं प्रययौ हृष्टो राघवेणाभिपालितः ॥"

इत्यन्तं श्रीपाद्मं च । अत्र सीतास्तननिपतिते नयने अपराधिनी । स्तनमांसगर्धया भूयान् व्रणः कृतः । गरीयानस्यापराधः । अयं न प्रणतिबुद्ध्या प्रणनाम । केवलं भूमौ अशक्त्या निपपात । "प्रणत इति दयालुः" इति श्रीस्तोत्ररत्ने । अत्र हितामिति हिनास्तिस्म नयनम् । तस्य हितं स्यादिति बुद्ध्यभावे तावतीमपि हिंसां न कुर्यात् । शस्त्रवैद्यकृतहिंसादेरिव हितत्वमस्या हिंसायाः; तत्र देहस्य हितत्वमत्रात्मन इति भेदः; यतः अयं दुष्प्रकृतिः – पुनरप्येवं दुष्प्रवृत्तिरस्य माभूदितीयं शिक्षा अनुग्रहविशेष एव । प्राणार्थिनः काकस्य प्राणरक्षणेन प्रपत्तिरपि सफला । ब्रह्मरुद्रेन्द्रमुख्याश्च देवा यद्बध्यरक्षणे न क्षमाः, स परमात्मा रामात्मैव सर्वैराश्रयणीय इत्यनेनाभिव्यज्यते ॥

इति श्रीमदयोध्याकाण्डार्थसंग्रहः ॥

अथ श्रीमदरण्यकाण्डार्थसंग्रहः ॥



अथ चित्रकूटे तापसजनैर्जनस्थाननिवासिखरमुखनिशाचरोपद्रुतैरन्यत्र गमनाय निवेदितः भगवान् श्रीरामचन्द्रः ततः प्रस्थायात्रिमहर्षेराश्रममागम्य तं भगवन्तमभिवाद्य, "तं चापि भगवानत्रिः पुत्रवत्प्रत्यपद्यत"- इति तेनाभिनन्दितः । तत्सहधर्मचर्या –

"दशवर्षाण्यनावृष्ट्या दग्धे लोके निरन्तरम् ।
यया मूलफले सृष्टे जाह्नवी च प्रवर्तिता ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उग्रेण तपसा युक्ता नियमैश्चाप्यलंकृता ।
अनसूया व्रतैः स्नाता प्रत्यूहाश्च निवर्तिताः ॥
देवकार्यनिमित्तं च यया सन्त्वरमाणया ।
दशरात्रं कृता रात्रिः ... ... ॥"

इत्युक्तरीत्या महाप्रभावया अनसूयया,

"नगरस्थो वनस्थो वा पापो वा यदि वा शुभः ।
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥
दुश्शीलः कामवृत्तो वा धनैर्वा परिवर्जितः ।
स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ॥"

इत्युपदिष्टहितया तद्दत्तमहार्हाभरणांगरागया च जानक्या समं तां निशीथिनीं तत्रत्याश्रमेऽनयत् । परेद्युः प्रातः सः,

"रक्षांसि पुरुषादानि नानारूपाणि राघव ।
वसन्त्यस्मिन् महारण्ये व्यालाश्च रुधिराशनाः ॥
उच्छिष्टं वा प्रमत्तं वा तापसं धर्मचारिणम् ।
अदन्त्यस्मिन् महारण्ये तान्निवारय राघव ॥
एष पन्था महर्षीणां फलान्याहरतां वने ।
अनेन तु वने दुर्गं गन्तुं राघव ते क्षमम् ॥"

इत्येवंप्रकारेण तयोरनसूयात्र्योर्नियोगेन दण्डकारण्यं प्रविश्य पावनतम-तापसाश्रममण्डलं ददर्श ।

"अभ्यागच्छन्महातेजा विज्यं कृत्वा महद्धनुः ।"

इति विनयेनाभिगमनसमये,

"माणिविडंबिनि तस्य मनोहरे वपुषि मग्नमना मुनिमण्डली ।
जपममुञ्चत होममसुञ्चत व्रतममुञ्चत वेदममुञ्चत ॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इतिवत् सर्वस्वव्यापारांस्त्यक्त्वा, "मंगलानि प्रयुञ्जानाः प्रत्यगृह्णन् दृढव्रताः ॥"—इत्युक्तरीत्या मङ्गलाशीर्वचनपुरस्सरं महनीयातिथेयानार्हायित्वा,

"ते वयं भवता रक्ष्या भवद्विषयवासिनः ।
नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वरः ॥
न्यस्तदण्डा वयं राजन् जितक्रोधा जितेन्द्रियाः ।
रक्षितव्यास्त्वया शश्वत् गर्भभूतास्तपोधनाः ॥"

इति तैर्दण्डकारण्यवास्तव्यैस्तापसजनैः प्रार्थित आत्मवान् श्रीरामभद्रः दण्डकाभिधाने तपोयोग्ये वने जङ्गमपारिजात इव तेषु तेष्वाश्रमेषु भ्रमित्वा तेषां तेषां तापसजनानां अभिमतार्थानाकलयत् ।

अथ दुर्गमारण्यानीप्रवेशसमये, "अङ्केनादाय वैदेहीम्"—इति सीतापहारिणः विराधाभिधानस्य यातुधानस्य वधमुखेन शरण्यत्वोपयोगिसामर्थ्यं बोधयन् तद्बोधोपहारमुखेन शरभङ्गं दृष्टवान् । श्रीशरभङ्गाश्रमवनगमनेन शरण्यत्वोपयोगि सौलभ्यं च प्रदर्श्यते ।

अथ शरभङ्गस्य महर्षेराश्रमे,

"मामेष वरदो राम ब्रह्मलोकं निनीषति ।
जितमुग्रेण तपसा दुष्प्रापमकृतात्मभिः ॥"

इत्युक्तरीत्या सानुगसुरेन्द्रप्रार्थितं तमासेव्य,

"ब्रह्मलोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिम् ।
त्वयाऽहं पुरुषव्याघ्र धार्मिकेण महात्मना ।
समागम्य गमिष्यामि त्रिदिवं देवसेवितम् ॥"

इत्युक्तरीत्या श्रीरामसेवालालसमानसेन तदभ्यागमनपरमहर्षयुतेन तेन सत्कृतः । स च महर्षिः,

"... ... ... मुहूर्तं पश्य तात माम् ।
यावज्जहामि गात्राणि जीर्णां त्वचमिवोरगः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततोऽग्निं सुसमाधाय हुत्वा चाज्येन मन्त्रवित् ।
शरभंगो महातेजाः प्रविवेश हुताशनम् ॥"

इति सर्वकर्मसमाराध्यस्य भगवतः पुरुषोत्तमरूपस्य श्रीरामभद्रस्य कटाक्षधारापवित्रितं स्वशरीरं हविर्हुताशने हुत्वा दिव्यरूपेण ब्रह्मलोकं प्राप । अथ काकुत्स्थः ;

"शरभङ्गे दिवं याते मुनिसंघास्समागताः ।
अभ्यागच्छन्त काकुत्स्थं रामं ज्वलिततेजसम् ॥"— इत्यारभ्य

"एहि पश्य शरीराणि मुनीनां भावितात्मनाम् ।
हतानां राक्षसैर्घोरैर्बहूनां बहुधा वने ॥ ... ...
एवं वयं न मृष्यामो विप्रकारं तपस्विनाम ।
ततस्त्वां शरणार्थं च शरण्यं समुपस्थिताः ॥
परिपालय नो राम वध्यमानान्निशाचरैः ।
परा त्वत्तो गतिर्वीर पृथिव्यां नोपपद्यते ॥"

इत्यन्तोक्तां महर्षिप्रार्थनामंगीकृत्य सुतीक्ष्णाभिधं तपोनिधिमभिगम्य तन्निरूपितक्रमेण मृगरूपधारिणां कामचारिणां तपस्विजनदूषकानां राक्षसानां वधारम्भेण मुनिजनप्रार्थनां सफलीचकार । अथ,

"अप्यहं जीवितं जह्यां त्यां वा सीते सलक्ष्मणाम् ।
न हि प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥"

इत्याद्युक्तरीत्या मुनिजनप्रार्थनया तदुपद्रवकारिराक्षसवधे धृतव्रतः पुनस्सुतीक्ष्णानुमत्या वातापितापनं वाचातीतवैभवम् महर्षिसेवितं भगवन्तं अगस्त्यमुनिं तद्भ्रातृसेवापूर्वकमासेवितवान् तस्मान्महर्षेर्वैष्णवशरासनब्रह्मखाक्षयतूणीराद्यायुधकलापं लब्ध्वा तदाज्ञया पञ्चवटीमाधिवसन् श्री राघवः शूर्पकारातिपीडितशूर्पणखाप्रसंगेन जनस्थाननिलयान् खरतर खरदूषणादीनहन् । अन्धतमसमिव स्वव्यापारैर्जगतां सर्वप्रवृत्तिनिरोधकं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्रिशिरोनामानं राक्षसप्रधानं निरस्य भास्वरवत्सन्मार्गं प्रकाशितवान्। तथा च सवितुरुदये अन्धकारनिचय इव भगवत्सन्निधौ कथमयं स्थातुं प्रभवति। अथ दूषणवधमधिकृत्य,

"तस्याभिपतमानस्य दूषणस्य स राघवः।
द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ॥

तं दृष्ट्वा पतितं भूमौ दूषणं निहतं रणे।
साधु साध्विति काकुत्स्थं सर्वभूतान्यपूजयन्॥"

इति श्रीमद्रामायणम्। "दूषणजलनिधिशोषणतोषित ऋषिगणघोषित-विजयघोषण" इति श्रीमद्वेदान्तगुरुचरणाः। अत्र दूषणेति नाम्नैवास्य तापसजनदूषकत्वमभिव्यज्यते, तस्य जलनिधित्वरूपणेन अम्बुधिवत् अप्रधृष्यत्वं च। ऋषिगणेति महर्षिसमुदायवाचिना गणशब्देन तदन्तर्गतेनागस्त्येनापि जलनिधिशोषणचणेन मयाऽप्यशोष्योऽयं दूषणजल-निधिश्शोषितोऽनेन श्रीरामभद्रेणेति सहर्षातिशयमुद्घोषितोऽस्य विजय इति द्योत्यते।

अथ चण्डपवन इव प्रधानस्य खरतरखरतरोः खण्डनसमये,

"अथापतन्तं संरब्धं कृतास्त्रो रुधिराप्लुतम्।
अपासर्पत्प्रतिपदं रामस्त्वरितविक्रमः॥"

इत्यत्रापसर्पणोक्त्या रामस्य रणभीरुतावगमान्न जगदेकवीरत्ववचनं सुवच-मिति न वाच्यम्। स्यादेष दोषः, यद्ययं तस्मात्पराङ्मुखीभूय पलायेतैव, न पुनरायोधनाय प्रवर्तेत। अपि त्वयं गुणाभिरामो रामः संहितास्त्र एवास्त्रप्रयोगनिरवकाशतया समीपमापतन्तं रुधिरगन्धोन्मादितं तमभिप्रेक्ष्य अस्त्रप्रयोगसौकर्याय तदभिमुख एव स्थितस्सन् व्याघ्रक्रमणन्यायेन पश्चात् किञ्चिदगच्छत्। क्षणान्तर एवामोघेन दिव्यास्त्रेणानीनयद्यमुनासहोदरा-तिथिताम्। इदमेवाभिप्रेत्यान्वगृह्णन्नाचार्यपादाः — "क्वचिदतिसङ्कटविषये

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

BVB Sri Sankaracharya Sanskrit Mahavidyalaya

सुभटानां अभिमतोऽयमपसर्पः ।" इति ।

अथ लोके खलु बलवानपि सहायसंपत्त्यभावे पराभिभवनीयो भवति । अयमेकोऽपि श्रीरामश्चतुर्दशसहस्रसंख्याकसेनाध्यक्षरक्षितं भीमबलं रक्षोबलमवधीत् । तदपि दिनपक्षमाससंवत्सरादिमितेन न चिरेण कालेन, अपि तु अल्पेनैव घटिकात्रयरूपेण कालेन । अहो शौर्यमहो दाक्ष्यम् ! आशुकारिणोप्यस्य कार्यसिद्धिरव्यभिचारिणी । अतोऽयं केवलमप्रतिद्वन्द्वपौरुषः, किं तु अनपायसाहसोऽपि । साहसिकानां हि कार्यसिद्धिः पाक्षिकी भवति, अस्य तु न तथेत्यन्यदेतद्विस्मयस्थानम् । अथ या पुराऽरण्यप्रस्थानावसरे,

"किं त्वामन्यत वैदेहः पिता मे मिथिलाधिपः ।
राम जामातरं प्राप्य स्त्रियं पुरुषविग्रहम् ॥
अनृतं बत लोकोऽयमज्ञानाद्यद्धि वक्ष्यति ।
तेजो नास्ति परं रामे तपतीव दिवाकरे ॥"

इत्यादिपरुषभाषणैः परिक्षिप्तवती, साऽद्य वैदेही, "अर्धाधिकमुहूर्तेन रामेण निशितैश्शरैः ।" — इत्याद्युक्तरीत्या, "वीरव्रणेन विगलद्रुधिरेण रोमकूपोल्लसद्भिरपि घर्मपयःकणौघैः । कोदण्डदण्डमवलम्ब्य विनीय वर्म किंचित्परिश्रमभृतं प्रियमीक्षमाणा ॥" इत्युक्तरीत्या जयलक्ष्मीसमाश्लेषसविशेषसुषुमास्पृहणीयं पराक्रममिव सविग्रहं भर्तारमवलोक्य नितान्तमुदिता सोष्मभिः स्वकीयस्तनतटैः वीरव्रणविरोपणं कुर्वाणेव वीरकृत्यनिर्वहणस्य पारितोषिकं प्रतिपादयन्तीव च स्वयमेव दृढतरं परिषस्वजे । यथोक्तं श्रीरामायणे,

"तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् ।
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥" — इति ।

एवं जनस्थानवधानन्तरं रणाङ्गणात्कथंचिन्मुक्तोऽकंपनः, "शृणु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राजन् यथावृत्तं रामस्य बलपौरुषम् ।" – इत्यारभ्य "न तं वध्यमहं मन्ये सर्वैर्देवासुरैरपि ॥" – इत्यन्तेन प्रतिपक्षभूतस्यापि रामस्य गुण-वर्णनपूर्वकम्,

"तस्यापहर भार्यां त्वं प्रमथ्य तु महावने ।
स तया रहितः कामी रामो हास्यति जीवितम् ॥"

इति तद्बधोपायभूतसीतापहरणाय रावणमचोदयत् । तदा सः तत्सहायार्थं मारीचसमीपमागत्य कथितवृत्तान्तस्य तस्य श्रीरामपराक्रमज्ञस्य मारीचस्य,

"प्रसीद लंकेश्वर राक्षसेन्द्र लंकां प्रसन्नो भव साधु गच्छ ।
त्वं स्वेषु दारेषु रमस्व नित्यं रामस्सभार्यो रमतां वनेषु ॥"

इति सान्त्ववादेन प्रतिनिवृत्य निजपुरीं प्रविवेश । तथाऽपि तथाविधश्री-रामपराक्रममवलोक्य परमोद्विग्नया लंकां प्रधाव्य तत्र सपरिवारं परमासन-गतं लोकरावणं रावणं सरोषपरुषभाषणेन धिक्कृत्य, निजवैरूप्यकरण-खरादिहननवृत्तान्तादिकमभिधाय,

"नैव देवी न गन्धर्वी नाप्सरा न च किन्नरी ।
नैवंरूपा मया नारी दृष्टपूर्वा महीतले ॥
यस्य सीता भवेद्भार्या यं च हृष्टा परिष्वजेत् ।
अतिजीवेत्स सर्वेषु लोकेष्वपि पुरन्दरात् ॥"

इत्यादिसीतारूपसंपद्वर्णनेन तस्यामनुरागमुत्पाद्य तदपहारेण स्वापकार-प्रतीकारं मन्यमानया शूर्पणखया पुनः प्रोत्साहितः पौलस्त्यः । अथ तस्मिन्,

"वृक्षे वृक्षे च पश्यामि चीरकृष्णाजिनाम्बरम् ।
गृहीतधनुषं रामं पाशहस्तमिवान्तकम् ॥"

इत्युक्तरीत्या श्रीरामास्त्रभीततया राक्षसकृत्याद्विरम्य कचिदकूपारपरपारानूप-प्रान्ते पुण्यारण्ये जटाचीरादीनि तापसचिह्नानि धृत्वा तपोनिरतं मारीच-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मवलोक्य रामकृतापकारं कथयित्वा तस्य भार्यां हर्तुं हेममयमृगरूप-धारणेन स्वसाहाय्यकं प्रार्थयमाने सति,

"सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥
न नूनं बुध्यसे रामं महावीर्यगुणोन्नतम् ।
रामो विग्रहवान् धर्मः साधुस्सत्यपराक्रमः ।
अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा ॥"

"न त्वं समर्थस्तां हर्तुं, अहं तस्य प्रभावज्ञो, न युद्धं तेन ते क्षमम्" – इत्यादि तदुक्तं हितवचनमयुक्तमित्यनंगीकृत्य,

"आसाद्य तं जीवितसंशयस्ते मृत्युर्ध्रुवो ह्यद्य मया विरुध्य ।
एतद्यथावत्प्रतिगृह्य बुध्या यदत्र पथ्यं कुरु तत्तथा त्वम ॥"

इति स्ववचनानंगीकरणे अहमेव त्वां हनिष्यामीति सनिर्बन्धं चोदितस्य

"मां निहत्य तु रामश्च नचिरात्त्वां वधिष्यति ।
अनेन कृतकृत्योऽस्मि म्रिये यदरिणा हतः ।"

इति रावणहस्तादपि श्रीरामहस्ताद्वधमेव वरमभिमन्यमानस्य रावणोक्तरीत्या लोभनीयतरमृगरूपं धृत्वा तस्य श्रीराघवस्याश्रमद्वारि संचरतो मारीचस्य दर्शनाद्विस्मितया सीतया तद्ग्रहणार्थं प्रार्थितः श्रीरामः तमनुधाव्य प्रसिद्ध-मृगजातिविजातीयेन तदीयव्यापारेण तं राक्षसमायाकृतमिति मत्वा ब्राह्मेणास्त्रेण मर्मणि विव्याध । अशनिसन्निभस्स शरोत्तमः प्रथमं मृगरूपस्य शरीरं विनिर्भिद्य ततः मारीचस्य हृदयं [तदन्तर्वर्तिस्वशरीरं] विभेद । यथोक्तं श्रीरामायणे :—

"शरीरं मृगरूपस्य विनिर्भिद्य शरोत्तमः ।
मारीचस्यैव हृदयं बिभेदाशनिसन्निभः ॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति । अत एवाहुश्श्रीमदागमान्तगुरुचरणाः श्रीमद्गद्ये, "मारीचमाया-मृगचर्मपरिकर्मितनिर्भरदर्भास्तरण" इति । श्रीमत्पादुकासहस्रेऽपि तैरुक्तम् —

"रङ्गेश्वरस्य मृगयोश्चरणावसक्तां
रक्षःकपीन्द्रमकुटेषु निवेशयोग्याम् ।
मन्ये पदावनि निबद्धविचित्ररत्नां
मायामृगस्य रचितामिव चर्मणा त्वाम् ॥" इति ।

एतदेव हि वीराणां स्वभावः, यदरातीन् पराजित्य तदीयवस्तुनो यथार्हं विनियोगः । तथा हि— पिनाकपाणिर्गजासुरं हत्वा तदीयाजिन-वसनात् कृत्तिवासा इति प्रथामश्नुते । पद्मापतिरपि भगवान् पञ्चजन-मसुरं हत्वा तत्प्रभवं पाञ्चजन्याख्यं शङ्खवरं करालंकारं व्यधत्त इत्यादि ।

"अंके न्यस्योत्तमांगं प्लवगबलपतेः पादमक्षस्य हर्तुः
कृत्वोत्संगे सलीलं त्वचि कनकमृगस्यांगमाधाय शेषम् ।
बाणं रक्षःकुलघ्नं प्रगुणितमनुजेनादरात्तीक्ष्णमक्ष्णः
कोणेनैवेक्षमाणस्त्वदनुजवचने दत्तकर्णोऽयमास्ते ॥"

इत्यादिप्रयोगाच्च । अतः श्रीरामः आसनार्थं, "चेलाजिनकुशोत्तरं" इति शास्त्रात् कुशास्तरणोपरि मारीचमायामृगचर्मास्तृतवानिति गद्योक्तिस्सूप-पन्ना भवति । आचार्यपादैश्चास्मिन् गद्ये श्रीरामायणोक्तार्थस्यैव संग्रहणात् ।

अथैवं श्रीरामेण हन्यमाने मारीचे श्रीराघवस्वरसदृशेन "हा सीते हा लक्ष्मण"— इति तारेण स्वरेणाकुश्य म्रियमाणे सति, तदाकर्ण्य विषण्णायाः स्वीयहितोक्तिभिरपि अविश्वस्तहृदयायास्सीतायाः,

"अनार्याकरुणारंभ नृशंस कुलपांसन ।
अहं तव प्रियं मन्ये रामस्य व्यसनं महत् ॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यारभ्य,

"मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा ॥"

इत्यन्तेन परुषभाषणैः परिक्षिप्तः लक्ष्मणः रामं प्रति परागतः। तदा तदन्तरप्रेप्सुना दुरात्मना परिव्राजकवेषधारिणा विजने जानकीमपहृत्या-गच्छता रावणेन समं मध्येमार्गं सीतां विमोचयितुं सुचिरं नियुध्य स्यन्दनादिभंगं कुर्वत्यपि तन्निकृत्तगरुत्तया भूमौ निपतिते रामाये-तद्वृत्तान्तनिवेदनार्थं कथंचिदवलम्बितप्राणे गृध्रराजे, मारीचं निहत्य तन्मायाविलपितेन साशंकं प्रत्यागच्छते सौमित्रिविज्ञापितसीतापरुष-भाषणादिवृत्तान्तेन विषण्णहृदयाय सीतामाश्रमेऽनवलोक्य ससन्तापातिरेकं तत इतस्तामन्वेषमाणाय श्रीरामाय सीतावृत्तान्तमुपक्षिप्य क्षिप्रं प्राणान् परित्यजति सति, तस्मै सद्गतिप्रदानसंस्कारादिविधानात् अस्य "अहं भक्तपराधीनः" इत्युक्तभक्तजनपारवश्यम् प्रकाश्यते। एवं च श्रीमच्छ्रुतिचूडागुरुचरणैः श्रीरघुवीरगद्ये उक्तम्— "विक्रमयशोलाभ-विक्रीतजीवितगृध्रराजदेहादिधक्षालक्षितभक्तजनदाक्षिण्य" इति। दाक्षिण्यं नाम औदार्यं, सौशील्यापरपर्यायं सरलत्वं वा। "दक्षिणस्सरलोदार-परच्छन्दानुवर्तिषु" इति शाश्वतः। तथा च यत्किञ्चित्कारिणोऽप्यस्य "गच्छ लोकाननुत्तमान्" इति मोक्षप्रदानेन परमौदार्यम्, तिर्यग्योने-रप्यस्य उत्तमवर्णश्रोत्रियस्येव दशरथेनात्मपित्राऽप्यप्राप्तस्य दाहसंस्कार-पिण्डोदकदानादेर्विधानात् अनितरसुलभं सौशील्यं वा अस्य रामस्य चाकशीति। अत्र च श्रीरामायणम्;—

"राजा दशरथश्श्रीमान् यथा मम महायशाः।
पूजनीयश्च मान्यश्च तथाऽयं पतगेश्वरः॥
सौमित्रे हर काष्ठानि निर्मथिष्यामि पावकम्।
गृध्रराजं दिधक्षामि मत्कृते निधनं गतम्॥" — इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"मत्कृते निधनं यस्मात् त्वया प्राप्तं द्विजोत्तम ।
तस्मान्मम प्रसादेन विष्णुलोकमवाप्स्यसि ॥"

इति श्रीनृसिंहपुराणवचनम् च । "द्विजातीनामेव सन्तिष्ठते ब्रह्ममेधः"— इति तिरश्चां कर्माधिकाराभावेऽपि इदं च द्रौपदीविवाहादिवत् ऐतिहासिक विलक्षणव्यक्तिविशेषनियतमिति नातिप्रसङ्गावकाशः । तूष्णीमनुष्ठितत्वेन वेदमुपपद्यते ।

अथैवं जटायुं संस्कृत्य पुनः कान्तारे कान्तां सीतामयोमुखीवैरूप्यकारिणा लक्ष्मणेन साकमन्वेषमाणेन श्रीरामेण घोरदर्शनः विकृतः स्वधर्षणोत्पादितरोषेण सुरर्षभेण वज्रायुधेन वक्षोदेशप्रवेशितशीर्षतया कबन्धाकृतिः स्थूलशिरोनाममुनिशापप्राप्तराक्षसभावः कश्चिद्दानवः तच्छापान्मोचितः । "ददाह स्वर्गतश्च सः" — इत्याद्युक्तरीत्या तस्य दिव्यरूपेण स्वर्गप्राप्तिस्तु श्रीरामकृतदाहप्रभावात् । स्वशापमोक्षणात् सहर्षं सीताप्राप्त्युपायतया सुग्रीवसख्यकरणचोदनपूर्वकमिममानन्दितवान् ।

अथ "शबरीं धर्मचारिणीं", "श्रमणीं धर्मनिपुणां अभिगच्छेति राघव" — इति कबन्धोक्तप्रकारेण प्रकामरमणीये मतंगारण्ये तपस्सिद्धानां मतंगशिष्याणां महाप्रभावाणां महर्षीणां परिचर्याविशेषेण परिशुद्धात्मस्वरूपा शबरी श्रीरघुवर्यसपर्यामहिम्ना सद्गतिमवाप ।

"चक्षुषा तव सौम्येन पूताऽस्मि रघुनन्दन ।
गमिष्याम्यक्षयान् लोकान् त्वत्प्रसादादरिन्दम ॥"

इत्युक्तत्वात् । शबरीति प्रतिलोमरूढा ।

"नृपायां वैश्यतो जातश्शबरः परिकीर्तितः ।
मधूनि वृक्षादानीय विक्रीणीते स्ववृत्तये ॥"

इति श्रीनारदीये । प्रतिलोमजातेः स्त्रिया अपि समधिगता सद्गतिप्राप्ति-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्सदाचार्यपरिचर्यानिष्ठाकाष्ठया । शबरी नाम शबरीत्याख्येत्यन्ये । 'उतामृ-तत्वस्येशानः", "अमृतस्यैष सेतुः" – इत्यादिप्रमाणप्रतिपन्नमोक्षप्रदत्वं श्रीरामरूपिणो भगवतो नारायणस्येव । तदुपायः भक्तिप्रपत्तिरूपः । तत्सिद्धिश्च सदाचार्योपासनादेव संभवतीत्यादिकमनेन ध्वन्यते । न च स्त्रीणां न योगाधिकारोऽस्तीति वाच्यम् । "न ते वागनृता काव्ये काचि-दत्र भविष्यति ॥" – इति ब्रह्मानुगृहीतेन महर्षिणा वाल्मीकिना "जगामात्मसमाधिना" इत्युक्तत्वात् । विदुरादेरिवास्या मुनिजनभजन-महिम्ना योगाधिकारसंभवात् । किं च योगारंभस्यैव जात्यादिक-मपेक्षणीयम् । तन्निष्पत्तिस्तु यस्मिन् कस्मिंश्चिज्जन्मनि स्यात् । तथा चोक्तम् —

"धर्मव्याधादयोऽप्यन्ये पूर्वाभ्यासाज्जुगुप्सिते ।
वर्णावरत्वे संप्राप्तास्संसिद्धिं श्रमणी यथा ॥" – इति ।

इति श्रीअरण्यकाण्डार्थसंग्रहः समाप्तः ॥

अथ किष्किन्धाकाण्डार्थसंग्रहः ॥

एवं चेतनोज्जीवनप्रकारप्रदर्शनार्थं प्रवृत्तेऽस्मिन् रामायणे मारीच-दर्शनवृत्तान्तेन भगवन्नित्यानुभवयोग्यस्य चेतनस्याप्राप्तविषयप्रावण्यं, तेन रावणरूपमहामोहाक्रमणं, जटायु रावणनिवृत्तिकथनात् केवलकर्मणा संसारस्यानिवर्त्यत्वं, लंकाप्रवेशेन सांसारिकशरीरप्रवेशः, एकाक्ष्येक-कर्णीप्रभृतिव्यापारैस्तापत्रयाभिहतिः, रामान्वेषणेन भगवतः चेतनो-ज्जीवनोपायचिन्तनं चोक्तम् । अथाचार्यमुखेन चेतनस्य स्वविषयभक्त्यु-त्पादनकृते तदन्वेषणमुच्यते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यः प्रपन्नकपिराजरक्षिता तद्विपक्षमभिभूतरावणम् ।
वालिनं समवधीत्स राघवो हन्तु मे षडरिवर्गमुद्धतम् ॥

अथैवं पितृवचनाश्रितदण्डकारण्यतया रावणापहृतां सीतां विचिन्वन् दाशरथिः मध्येमार्गं स्वकरस्पर्शान्मोचितशापबन्धकबन्धोक्तरीत्या,

"अभित्वरे च तं द्रष्टुं सुग्रीवं वानरर्षभम् ।
तदधीनं हि मे सौम्य सीतायाः परिमार्गणम् ॥"

इति सीताधिगमार्थं सुग्रीवं द्राक् दिदृक्षुः परमरमणीये प्रियाविरहित-तरुणजनमनोहरणपटुतरवालपवनोन्मादितपम्पातीरे संचरन्नासीत् । तदा वालिनिरस्तेन मतंगशापात्तदगम्यमृश्यमूकमधिवसता दावधूमशंकया वारिवाहभीतेन नीलकण्ठेनेव वालिप्रहितप्रणिधिभ्रमेण तस्माद्बिभ्यता सुग्रीवेण प्रेषितस्य भावपरीक्षार्थं विश्वसनीयभिक्षुरूपप्रतिच्छन्नस्य पवनात्मजस्य स्पृहणीयतरवचनचातुरीविशेषेणाह्लादितवान् रामः "बुद्धिमान्नीतिमान्वाग्मी, स्मृतिमान् प्रतिभानवान्, स्मितपूर्वाभिभाषी च, उत्तरोत्तर-युक्तौ च वक्ता वाचस्पतिर्यथा" – इत्यादिप्रशंसितबुद्ध्यादिप्रभावस्य ; "विद्वानेव विजानाति विद्वज्जनपरिश्रमम्" इति न्यायादेतादृशरामस्यापि हृदयरंजकत्वाद्धनुमद्वाचानितरसाधारणी हृद्यता ध्वन्यते ।

अथ "न तस्येशे कश्चन, एकश्शास्ता न द्वितीयोऽस्ति कश्चित्", इत्यादिकया श्रुत्या निरुपाधिकस्वातन्त्र्ययुक्तस्यापि तस्य श्रीरामभद्रस्य हनुमद्वचनेन सुग्रीवकर्मकशरणवरणात्सिद्धं पारतन्त्र्यमाविष्क्रियते । तथा च श्रीरामायणे लक्ष्मणवचनम्,

"अहं चैव हि रामश्च सुग्रीवं शरणं गतः ॥
गुरुर्मे राघवस्सोऽयं सुग्रीवं शरणं गतः ।
स रामो वानरेन्द्रस्य प्रसादमभिकांक्षते ॥" – इत्यादि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"रामस्त्वां शरणं गतः" इति हनुमद्वचनं च । "आत्मानं मानुषं मन्ये" इत्यात्मनो मानुषभावनानुगुणं लोकसंभावनार्थं,

"राम षड्युक्तयो लोके याभिस्सर्वं विमृश्यते ।
परिमृष्टो दशान्तेन दशाभागेन सेव्यते ॥"

इत्युक्तरीत्या, स्वतन्त्रोऽपि स्वतः समर्थोऽपि, शरण्योऽपि, काश्चिद् दुर्दशापन्नः स्वसदृशं पुरुषान्तरं सहायार्थमाश्रयेदिति राजनीतिरवबोधनात्, अनेनापि भगवतस्सौशील्यं नितरामाविष्कृतम् । अत आहुः श्रीमद्वेदान्तगुरुशेखराः — "तरणिसुतशरणागतिपरतन्त्रीकृतस्वातन्त्र्य" — इति । अत्र प्रतीयमाना शरणागतिः सुग्रीवकर्तृका च भवेत् । तथा हि — पूर्वं "बाहुरेष प्रसारितः, गृह्यतां पाणिना पाणिः", — इत्युक्तवति सुग्रीवे सप्तसालभञ्जनानन्तरं सख्यार्थं प्रसारितपाणिभ्यां सांजलिबन्धं आचिन्तित पांसुकर्दमशर्करादिके धरातले दण्डवत्प्रणिपत्य शरणं गते सति, "तस्य च वशीकरणं तच्छरणागतिरेव", — इत्युक्तप्रकारेण तद्वशंवदः श्रीरामः स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदोऽपि स्वसत्तास्थितिप्रवृत्तीस्तदधीनाश्चकारेति च द्योत्यते ।

अथ भगवता दाशरथिना,

"ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम् ।
सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ ॥"

इत्युक्तरीत्या वह्निसाक्षिकं सुग्रीवेण सख्यमुपगम्य मिथः स्वस्ववृत्तान्तकथनानन्तरं,

"वालिनो मे भयार्तस्य सर्वलोकाभयङ्कर ।
ममापि त्वमनाथस्य प्रसादं कर्तुमर्हसि ॥"

इति सुग्रीवप्रार्थनामंगीकृत्य "अद्यैव तं हनिष्यामि तव भार्यापहारिणम्"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति वयस्यार्थं वालिवधः प्रतिज्ञातः। तदा वालिविक्रमाभिभूततया स्वस्मिन्वीर्यशंकितस्य,

"वालिनः पौरुषं यद्यद्यच्च वीर्यं धृतिश्च या।
तन्ममैकमनाश्श्रुत्वा विधत्स्व यदनन्तरम्॥
समुद्रात्पश्चिमात्पूर्वं दक्षिणादपि चोत्तरम्।
क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः॥"

इत्यारभ्य तत्पराक्रमं सविस्तरमुपवर्ण्य,

"एषोऽस्थिनिचयस्तस्य दुन्दुभेस्संप्रकाशते।
वीर्योत्सेकान्निरस्तस्य गिरिकूटोपमो महान्॥"

इति वालिनिरस्तं दुन्दुभिकंकालकूटं प्रदर्श्य,

"वालिनं निहतं मन्ये दृष्ट्वा रामस्य विक्रमम्।
हतस्य महिषस्यास्थि पदेनैकेन लक्ष्मण॥
उद्यम्याथ प्राक्षिपेच्चैत्तरसा द्वे धनुश्शते।"

इति पराक्रमप्रत्यायनं प्रार्थयतस्सुग्रीवस्य समक्षं महाबलः श्रीरामः, कियन्मात्रमेतदिति तत्रानादरद्योतनार्थं स्वदक्षिणेतरपादांगुष्ठदरचलनमात्रेण गिरिकूटोपमं तत्कंकालकूटं संपूर्णदशयोजनदूरं चिक्षेप; अनेन सुग्रीवो विश्वस्तोऽभूत्। अत एवोक्तं श्रीमदाम्नायकिरीटशेखरैः तद्गद्ये —- "दृढ-घटितकेलासकूटविकटदुन्दुभिकंकालकूटदूरविक्षेपदक्षदक्षिणेतर पादांगुष्ठदर-चलनविश्वस्तसुहृदाशय" इति। ननु,

"असुरस्य तनुं शुष्कं पादांगुष्ठेन वीर्यवान्।
क्षिप्तं दृष्ट्वा ततः कायं सुग्रीवः पुनरब्रवीत्॥" - इत्यारभ्य,

स एव संशयस्तात तव तस्य च यद्वले।
सालमेकन्तु निर्भिन्द्याः भवेद्व्यक्तिर्बलाबले॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृत्वेमं कार्मुकं सज्यं हस्तिहस्तमिवायतम् ।
आकर्णं पूर्णमायम्य विसृजस्व महाशरम् ॥"

इत्यन्तम् स्वप्रार्थनाधिकविधानेऽपि संशयानपायात् अतृप्तेन सुग्रीवेण बलज्ञानार्थं पुनस्सालभेदनचोदनात्, विश्वस्तत्वोक्तिः कथं संगच्छते? इति चेत्, अत्र केचित् – सुग्रीवेण द्वितयं जिज्ञासितं देहबलं अस्त्रबलं चेति । तत्र देहबलं वालिना हस्ताभ्यां यावद्बलमुद्यम्यापि एकयोजनमेव क्षिप्तस्य दुन्दुभिशरीरास्थिकूटस्य एकपादेन द्विधनुश्शतदूरमात्रनिरसन-प्रार्थनाधिकतया रामेण लीलया वामपादांगुष्ठस्पन्दनेनैव पूर्णदशयोजन-दूरविक्षेपणेन सम्यक् ज्ञातमेव । अस्त्रबलस्याज्ञातत्वात्तदर्थं सालभेदन-प्रेरणेति श्रीमदाचार्यपादाभिसन्धिः । तस्माद्देहबलस्य ज्ञातत्वेन, "विश्वस्तसुहृदाशय", – इत्युक्तिरिति वदन्ति । वस्तुतस्तु, "रूप-मेवास्य महिमानं व्याचष्टे", -- इति दिव्यमंगलविग्रहावलोकनेनैवास्य महिम्नो ज्ञातुं शक्यत्वेऽपि, वालिबलपरामर्शजनितभीत्यतिशयात् श्री राघवे वीर्यशङ्कितः बलप्रत्यायनां प्रार्थ्य तेन स्वप्रार्थनाधिकविधानेनान्त-र्विश्वस्तोऽपि सुग्रीवः पुनरप्यनितरसाधारणतदीयास्त्रविद्यानैपुणीदर्शन-कुतूहलेन प्रत्ययान्तरं प्रार्थयामास । एतच्च, "कृत्वेमं कार्मुकं सज्यं...॥" इति श्लोके चापस्य सज्जीकरणाकर्णपूर्णाकर्षणवाणविसर्जनचोदनयाऽभि-व्यञ्जितम् । अन्यथा अस्त्रविद्याभिज्ञे रामे तत्प्रार्थनस्य निष्फलत्वात् । "सालमेकन्तु निर्भिन्द्याः", — इत्येव चरितार्थत्वादित्यन्ये ।

अथ सुग्रीवप्रार्थितक्रमेण कृतमस्त्रबलख्यापनमभिवर्ण्यते श्रीमद्रघु-वीरगद्ये – "अतिपृथुलबहुविटपिगिरिधरणिविवरयुगपदुदयविवृतचित्रपुङ्ख-वैचित्र्य", – इति । तथा च श्रीरामायणम्;

"स विसृष्टो बलवता बाणः स्वर्णपरिष्कृतः ।
भित्त्वा सालान् गिरिप्रस्थे सप्त भूमिं विवेश ह ॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यारभ्य, "रामस्य शरवेगेन विस्मयं परमं गतः" — इत्यन्तम्। तत्र सुग्रीवप्रार्थनारीत्या सालमात्रभेदने सत्ययं मम वालिसाम्यमेव प्रतीयात्, न तु तदाधिक्यम्। पुनरप्यन्यां पराक्रमप्रत्यायनां वा प्रार्थयेदिति तदचोदितं गिरिधरण्योरपि भेदनं कृतं प्रतिभानवता श्रीरामभद्रेणेति भावः। तथा स्कान्दे,

"सप्तभूमीस्सप्तगिरीन्सप्तसालान् महाबलान्।
स बाणो वेगसम्पन्नो भित्वा तूणीरमाविशत्॥" -- इति।

"त्रिभुवनमपि भिन्द्यामेकबाणेन वेगात्
कियदिदमिति मित्रं बोधयन् लीलया यः।
अभिनदिषुवरेणैकेन सालान् गिरिं गां
स दिशतु मम वाचं पुष्कलां पुष्करात्तः॥"

इति श्रीगद्यव्याख्याने। एवं सालादिकं भित्वाऽपि वहिर्निर्गमने मनागपि पुङ्खभङ्गाद्यदर्शनेन अप्रयुक्तबाणवदेव दर्शनीयरूपपुङ्खवत्वात् चित्रपुङ्खशब्देन बाणोक्तिः। किं च क्षणादेव सप्तसालगिरिधरणीर्भित्वाऽविकृततयैव पुनः स्वतूणीरप्रवेशस्य अनितरसाधारणस्यात्यद्भुतत्वात् वैचित्र्येत्युक्तिः। सर्वमप्येतद्विद्यामाहिन्नेति तत्प्रयोक्तुरस्य श्रीरामस्यास्त्रविद्यावैशारदी अनितरसाधारणीत्यादिकं व्यज्यते। अथैवं प्रार्थनाधिकप्रत्ययोत्पादनेन प्रमुदितान्तःकरणस्य,

"स मूर्ध्ना न्यपतद्भूमौ प्रलम्बीकृतभूषणः।
सुग्रीवः परमप्रीतो राघवाय कृताञ्जलिः॥
तमद्यैव प्रियार्थं मे वैरिणं भ्रातृरूपिणम्।
वालिनं जहि काकुत्स्थ मया बद्धोऽयमञ्जलिः॥"

इति स्वनिष्कारणवैरिणो वालिनो वधार्थं शरणागतस्य सुग्रीवस्य प्रार्थनया

"पाण्डवान् द्विषसे राजन् मम प्राणा हि पाण्डवाः॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्युक्तरीत्या आश्रितविरोधिनः स्वस्य परमविरोधित्वाद्भगवता श्रीराघवेण, योऽयं वरबलभुजबलावलिप्तं सकललोकविरावणमपि रावणं गरुत्मानिव पन्नगम् सावज्ञं कक्षोपपीडं गृहीत्वा लीलया चतुर्ष्वपि समुद्रेषु सन्ध्यामुपास्य क्षणेन किष्किन्धामागत्य जीवन्मृतकमेवैनं भूमौ विनिपात्याजानन्निवाप्राक्षीत्, "भो, लङ्केश्वर कुतः कदा वा आगतः?" – इति; सोऽपि वाली बाणेनैकेन प्रेतनाथातिथीकृतः। अनेनाऽस्य पराक्रमातिशयः परो वाचामिति ध्वन्यते। तदुक्तं श्रीरघुवरिगद्यव्याख्यातृभिः—

"यो वाली निजतातबन्धनरुषेवोद्गृह्य रक्षःपतिं
कक्षागाढनिपीडितं विषधरं तार्क्ष्यो यथा लीलया।
लोकानामिव दर्शयन् चतुरकूपारेषु सन्ध्यामदात्
तद्भंगावहदिव्यबाणमहिमा रामोऽवतान्नस्सदा॥" - इति।

नन्वयं वालिवधः कथमुपपद्यते? — अनपराधिविषयत्वेनानुन्मुखविषयत्वेन चाधर्म्यत्वादिति चेत्, श्रूयताम्, अत्र किं वालिनोऽतिशयितनियमसहकृतसन्ध्योऽपासनराज्यपरिपालनादियुक्तत्वेन शास्त्रवश्यतामवलम्ब्य तद्वधस्याधर्मत्वमभिप्रेतं, उत शाखामृगत्वमवलम्ब्येति चेत्, जीवतः स्वानुजस्य भार्यागमनरूपपापाचरणवतस्तस्य दण्ड्यत्वात् तद्वधो युक्तरूप एव।

"औरसीं भगिनीं वाऽपि भार्यां वाप्यनुजस्य यः।
प्रचरेत नरः कामात् तस्य दण्डो वधः स्मृतः॥"

इति स्मृतेः। रणांगण एव पराङ्मुखवधस्य दोषत्वं, न तु प्रायश्चित्तरूपदण्डप्रकरण इत्यसंमुखवधोऽपि न दोषाय। यदि शाखामृगत्वमवलंब्य, तर्हि मृगयान्यायेन यथाकथंचित् हननेऽपि न दोषलेशावकाशः।

"तिर्यक्षु नैव हि विपक्षितयोपचारः", – इति श्रीश्रीवत्साङ्कमिश्राः श्रीमदतिमानुषस्तवे। वस्तुतस्तु वालिनस्साक्षादनपराधित्वेऽपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वाश्रितस्य सुग्रीवस्य निरागसश्शरणागतस्यापकाराचरणेन स्वस्य महापराधित्वात् तद्वधो धर्म्य एव । प्रच्छन्नतया पराङ्मुखवेधनमपि,

"स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः ।
अर्थितो मानुषे लोके जज्ञे विष्णुस्सनातनः ॥"

इति भगवतो दुष्कृन्नाशनरूपावतारप्रयोजनार्थं । अन्यथा अभिमुखीभूय युद्धविधाने, "रिपूणामपि वत्सलः'—इत्युक्तरीत्या श्रीरामभद्रगुणाकृष्टः प्रह्वीभवेत् वाली । तदा तद्वधो न युक्तरूपः । तेन सुग्रीवाय वालिवधप्रतिज्ञा व्याहन्येत । किं च रावणस्य वयस्यतया वाली तेन सीतां रामाय दापयेत्, ततश्च देवकार्यं विलुप्तमेव स्यात् । अतः प्रच्छन्नवधः । यद्वा,

"आहूय वालिनं ब्रह्मा ददौ वरमनुत्तमम् ।
प्रतीपवर्तिनो भूयादर्धं बलमरिन्दम ॥"

इति वालिने ब्रह्मदत्तवरपरिपालनार्थस्स इत्यलम् ॥

इति श्रीमत्किष्किन्धाकाण्डार्थसंग्रहः समाप्तः ॥

अथ श्रीमत्सुन्दरकाण्डार्थसंग्रहः ॥



अथ वालिवधानन्तरं तद्राज्येऽभिषिक्तेन सुग्रीवेण सीतान्वेषणार्थं दिक्षु प्रस्थापिता वानरयूथपाः । तेष्वंगदादिभिस्सह दक्षिणाशां गतो हनुमान् विन्ध्योद्देशे प्रासंगिकेन सम्पातिवचनेन वैदेहीं लंकास्थामवगत्य शतयोजनविस्तीर्णमर्णवं पुप्लुवे । ततो रावणराजधान्यां लंकायामशोकवनिकामध्ये शिंशुपातरोरधः श्रीरामानुध्यानसुधाधाराधार्यमाणजीवितां जनकराजसुतां ददर्श । तद्विस्रंभणार्थं,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह ।
राजा दशरथो नाम रथकुञ्जरवाजिमान् ॥"

इत्यादितद्दयिततमवार्तामुपायनीकृत्य समीपमुपगतः । तदा,

"यथा यथा समीपं स हनुमानुपसर्पति ।
तथा तथा रावणं सा तं सीता परिशङ्कते ॥"

इत्युक्तरीत्या पुरा यतिरूपमिवाद्य वानररूपं धृत्वा रावण एवायमागत इति परिशंक्य "यानि लिंगानि रामस्य", "कीदृशं तस्य संस्थानं रूपं रामस्य कीदृशम् ॥" इत्यादिकया तं सीता पृष्टवती । तदा,

"रामः कमलपत्राक्षस्सर्वसत्त्वमनोहरः ॥"

इत्यादि श्रीरामांगप्रत्यंगसालक्षण्याद्यभिवर्णनेन,

"रामनामांकितं चेदं पश्य देव्यंगुलीयकम् ।"

इति श्रीरामांगुलीयकप्रदानेन,

"अनिद्रस्सततं रामस्सुप्तोऽपि च नरोत्तमः ।
सीतेति मधुरां वाणीं व्याहरन् प्रतिबुध्यते ॥"

इत्यादितात्कालिकश्रीरामावस्थाकथनेन च तां प्रत्याय्य कृतकृत्यो बभूव । तथाऽपि,

"न ह्येकस्साधको हेतुः स्वल्पस्यापीह कर्मणः ।
यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥"

इति प्रकृतकार्याविरोधेन स्वाम्यभिमतकार्यान्तरकरणस्य समर्थकृत्यत्वात् निसृष्टार्थोऽयं मारुतिः रावणबलव्यवसायाद्यवबोधनार्थं तन्नेत्रभूतमशोकवनं बभञ्ज । विदितवृत्तान्तेन रावणेन प्रेषितानतिबलपराक्रमान् जम्बुमाल्यक्षप्रमुखान् यातुधानान् अहन् । एतत्सर्वं "न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥" – इति न्यायेन लेखाहारिणो न मम पराक्रम-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतं, अपि तु, "सिद्ध्यन्ति कर्मसु महत्स्वपि यन्नियोज्यास्संभावनाफलमवेहि तमीश्वराणाम् ॥" — इति न्यायेनास्मत्स्वामिश्रीरामपराक्रमप्रभावकृतमित्यभिप्रायेण,

"जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ।
राजा जयति सुग्रीवो राघवेणाभिपालितः ।
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥"

इत्यादिना नाम विश्राव्य पुनरिन्द्रजिता ब्रह्मास्त्रेण बद्धः ।

"स बद्धस्तेन वल्केन विमुक्तोऽस्त्रेण वीर्यवान् ।
अस्त्रबन्धस्स चान्यं हि न बन्धमनुवर्तते ॥"

इत्युक्तरीत्या तद्बन्धे कोणपकृतशणवल्कबन्धेन विफलेऽपि सति, रावणदिदृक्षया राक्षसकृतोपद्रवमपि मर्षयित्वा रावणसमीपे वृत्तान्तकथनपूर्वकं धृष्टतया स्वाधिक्षेपरुष्टेन दुष्टेन तेनाज्ञापितस्य वधस्य धर्मात्मना विभीषणेन निषिद्धत्वात्, वैरूप्यकरणाय स्ववालधौ सन्दीप्यमानेन सीताप्रभावात् स्वस्य शीतीभूतेन तेनैव लांगूलस्थेनाग्निना साट्टप्राकारतोरणां समस्तामपि लंकां सन्दीप्य पुनरपि सीतामाश्वास्य प्रत्यागत्य,

"तत्र दृष्टा मया सीता रावणान्तःपुरे सती ।
सन्यस्य त्वयि जीवन्ती रामा राम मनोरथम् ।
एकवेणीधरा दीना त्वयि चिन्तापरायणा ॥"

इत्यादि तदीयावस्थां अभिधाय,

"मनश्शिलायास्तिलको गण्डपार्श्वे निवेशितः ।
त्वया प्रणष्टे तिलके तं किल स्मर्तुमर्हसि ॥"

इति सीताप्रत्यभिज्ञां,

"जीवितं धारयिष्यामि मासं दशरथात्मज ।
ऊर्ध्वं मासान्न जीवेयं ... ... ॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति तव्यवसायं च श्रीरामाय विज्ञापितवान् हनुमान्। एवं महोपकारकर्तुः हनूमतः परिष्वंगमेव सदृशं प्रत्युपकारमनुसंहितवान्

"कथंचिदुपकारेण कृतेनैकेन तुष्यति।
न स्मरत्यपकाराणां शतमप्यात्मवत्तया॥"

इति कृतज्ञसार्वभौमश्रीचक्रवर्तितनूजः। तथा च श्रीरामायणम्:—

"इदन्तु मम दीनस्य मनो भूयः प्रकर्षति।
यदिहास्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम्।
एष सर्वस्वभूतो मे परिष्वंगो हनूमतः॥" इति।

अयं भावः--दुरात्मना रावणेन लंकायामुपरुद्धाया अतीतेष्वपि दशसु मासेषु मम प्रवृत्त्यनुपलंभेन रावणराक्षसीदुरुक्तिभिश्चातीव दुर्मनायमानायाः, गत्यन्तराभावात् वेण्युद्ग्रथनेन प्राणपरित्यागव्यवसितायास्सीतायाः, मद्वृत्तान्तप्रापणेनांगुलीयकप्रदानेन च प्राणपरिरक्षणं कृत्वा तामाश्वास्य च पुनस्तद्वृत्तान्तेन तददर्शने निश्चितजीवत्यागस्य ममापि जीवितप्रदानरूपमहोपकारकर्तुर्महात्मनोऽस्य हनूमतः यद्यहमनुरूपतरं प्रत्युपकारं न करोमि, तदा मम स्वरूपसत्तैव न प्रसिद्ध्येत्, स च प्रत्युपकारस्सर्वस्वदानमन्तरेण न घटते। तादृशं तु दानं नेदानीं संभवति। स्वल्पमप्युपकारादिकं काले हि क्रियमाणं महते सन्तोषाय भवति; न त्वकाले क्रियमाणं प्रभूतमपि। तस्मात् प्रियाख्यानरूपसमुचितावसरे दीयमानमिदमालिंगनमेव सर्वस्वदानप्रतिनिधिर्भवत्विति श्रीरामेणानुसंहितमिति। "काले खलु समारब्धाः फलं बध्नन्ति नीतयः॥" इति महाकविः।

ननु कथमेतत् परिष्वंगमात्रस्य सर्वस्वदानसादृश्यमिति चेत्— श्रूयतामवधानतः; यत्साक्षात्काराय, "भक्त्या त्वनन्यया शक्यः"— इत्युक्तरीत्या तदुपाय भूत चिरकाल सावधानसंपादनीय दुष्कर भक्तियोग-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिद्ध्यर्थं दुश्चरतपोविशेषैर्महान्तमपि कायक्लेशं मर्षयन्ति महान्तः; यश्च, "रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणं।" — इत्युक्तरीत्या पुंसामपि मनोमोहनरूपादियुक्ततया, "रिपूणामपि वत्सलः" -- इत्युक्तरीत्या "तरुणौ रूपसंपन्नौ, त्वमप्रमेयश्च दुरासदश्च, रामो विग्रहवान् धर्मः, व्यक्तमेष महायोगी परमात्मा सनातनः", इति शत्रुभिरपि संश्लाघ्येत, तेन भगवता रामेण दीयमानात् निरतिशयरूपलावण्यसौन्दर्यादिसमुत्पत्ति-स्थानभूतया स्वैश्वरूप्येण सदाऽनुभूतयाऽप्यपूर्ववद्विस्मयमादधानया सीतारूपिण्या श्रियाऽपि अलभ्यात् प्रीतिपूर्वकं स्वयंग्रहाश्लेषात् किम-स्त्यधिकं सर्वस्वदानमिति तत्साद्दश्यं कैमुत्यसिद्धमिति। अपारपारावार-परिधापरिसृतत्वात् लंकायाः दुष्प्रवेशत्वं, परपुरत्वात् तत्रापि शत्रुसंबंधित्वे-नापायभूयिष्ठत्वं च दृश्यते। तथाविधस्यापि पुरस्य दाहकत्वात् तस्या-नितरसाधारणः सामर्थ्यातिशयः ध्वन्यते। यस्यायमीदृशो दूतस्तस्य प्रभावातिशयोऽवाङ्मनसगोचर इति किमु वक्तव्यम्॥

इति श्रीमत्सुन्दरकाण्डसंग्रहः समाप्तः॥

॥ अथ युद्धकाण्डार्थसंग्रहः ॥

—:o:—

अथैवं वैदेहीवार्तायामुपलब्धायां तदपहर्तृशत्रुजिघांसया नीलेन सेनापतिना संरक्ष्यमाणां महतीं वानरानीकिनीं आदायांगदोद्यमानेन सौमित्रिणा समं हनूमन्तमारूढे श्रीरामभद्रे सागरस्योत्तरे तीरे निविष्टे सति, लंकायां वानरमात्रेण कृतं कर्मातिमानुषमालोच्य अनन्तरकरणी-याय रावणः प्रहस्तादिभिर्मन्त्रिभिर्मन्त्रयांचकार। तदा लब्धावसरः विभीषणः "प्रदीयतां दाशरथाय मैथिली", इत्यादि हितं विज्ञापयामास।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथाऽपि "त्वां तु धिक्कुलपांसनम्"-इत्यादिपरुषभाषणेन तं धिक्कृतवान् दुर्वृत्तस्तदग्रजः। तदसहमानस्य तं परित्यज्य श्रीरामगुणाकृष्टतया मुहूर्तेन तत्समीपमागत्यान्तरिक्ष एवावस्थाय,

"उवाच च महाप्राज्ञः स्वरेण महता महान्।
सुग्रीवं तांश्च संप्रेक्ष्य सर्वान् वानरपुंगवान्॥"

इति सुग्रीवादीनेव पुरुषकारीकृत्य सौहार्दाभिव्यञ्जकेन स्वरेण महता,

"रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः।"—इत्यारभ्य,

"त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः।
सर्वलोकशरण्याय राघवाय महात्मने।
निवेदयत मां क्षिप्रं विभीषणमुपस्थितम्॥"

इत्यन्तोक्तप्रकारेण श्रीराघवं शरणमुपगम्यात्मनश्शरण्यपरिग्रहं प्रार्थयमानस्य विभीषणस्य परिग्रहे, "सूक्ष्मः परमदुर्ज्ञेयस्सतां धर्मः प्लवंगम।"—इत्युक्तरीत्या पृथग्जनदुर्ज्ञेयं शरणागतसंरक्षणरूपं परमधर्मं शरण्यव्रतं चाविज्ञाय केवलं राजनीतिमनुसृत्य शत्रुपक्षीयोयं राक्षसो न संग्राह्य इति विरोधवादिनां मन्त्रित्वेनाभिमतानां सुग्रीवादीनां प्रत्यायनसमये विजृम्भितं भगवतो दाशरथेस्सर्वेश्वरत्वम्। तदिदमाहुः श्रीमद्वेदान्ताचार्यशेखराः—"विमतसहोदर रक्षःपरिग्रह विसंवादि विविधसाचिवजन विस्रंभणसमय-संभ्रम विजृंभित सर्वेश्वरभाव।"—इति। अत्र श्रीरामायणम्—

"सुदुष्टो वाप्यदुष्टो वा किमेष रजनीचरः।
सूक्ष्ममप्यहितं कर्तुं ममाशक्तः कथंचन॥
पिशाचान् दानवान् यक्षान् पृथिव्यां ये च राक्षसाः।
अंगुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर॥"—इति।

अयं भावः—विभीषणे, "निवेदयत मां क्षिप्रं"—इति घटक-मुखेन श्रीराघवं शरणं गते सति,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"एतत्तु वचनं श्रुत्वा सुग्रीवो लघुविक्रमम् ।
लक्ष्मणस्याग्रतो रामं संरब्धमिदमब्रवीत् ॥"

इत्यारभ्य, "रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः ।" – इति स्वजातिसहजशाठ्यवत्त्वरावणप्रणिधित्वादिहेतुभिस्सह भार्यापहर्तृरावणभ्रातृत्वं हेतुतयोपन्यस्य, केवलनिरसने कृते मारीचवदनर्थकारी स्यादतस्सानुगस्यास्य वधान्तो दण्डः कार्य इति व्यजिज्ञपद्वानराधिपतिस्सुग्रीवः । एतच्छ्रुत्वा अन्यानपि सचिवान् स्वं स्वं मतमनुयुञ्जाने रघुनन्दने, तस्य गुणदोषपरीक्षा करणीयेत्यवददंगदो युवराजः । परीक्षायाः कार्येषु विनियोगं विनाऽसंभवात्सहसा विनियोगे मित्रहान्यापत्तेश्च न युक्तरूपा परीक्षा । अतस्समर्थेन चारेण परीक्ष्य संग्राह्य इति शरभस्समभाषत । दूरतया सांप्रतिकभयाभावेन आगमनप्रयोजनरहिते देशे अत्यापन्नस्वामिपरित्यागानर्हे काले चागतत्वात् सर्वथा शंक्य एवायं न परिग्रहार्ह इति जगाद जाम्बवान् । मैन्दस्तु – सर्वथा शंक्यत्वे सुखोपनतमित्रहानिस्स्यात्; अतः मधुरेण वचसा ज्ञातपुरुषेण रावणवृत्तान्ते पृच्छ्यमाने, तत्प्रतिवचनेन भावमस्य विज्ञाय यथार्हं क्रियतामित्याह । एवं सुग्रीवादिभिर्विभीषणस्य स्वाभिमतैर्हेतुभिरपरिग्राह्यत्वे साधिते सति, तैरुक्तानां हेतूनां अनैकान्त्यादिदोषदुष्टत्वात् तन्मतमपनुद्याशंक्यत्वोपयुक्तान् प्रसन्नवदनत्वादीन् सोपबर्हान् हेतूनुपन्यस्य विभीषणस्य संग्राह्यत्वमद्धा सिद्धान्तयामास मतिमान्मारुतात्मजो हनूमान् । तथा च तदुक्तिप्रकरणे श्रीमद्रामायणम्;

"अथ संस्कारसंपन्नो हनूमान् सचिवोत्तमः ।" – इत्यारभ्य,

"एतावत्तु पुरस्कृत्य युज्यते तस्य संग्रहः ।
यथाशक्ति मयोक्तन्तु राक्षसस्यार्जवं प्रति ॥
त्वं प्रमाणन्तु शेषस्य श्रुत्वा बुद्धिमतां वर ॥" – इत्यन्तम् ।

अथैवं सचिवेषु विसंवादिषु सत्सु स्फुटं तत्प्रतिषेधे सति विमना-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शेरंस्त इत्याशंक्य तदुपच्छन्दनपूर्वकं 'यद्यपि भवदुक्तो दोषः तस्य स्याद्वा न वा; तथाऽपि शरणागतत्वादयं संग्राह्यः । वध्योऽपि मित्रभावेन संप्राप्तः रक्ष्य एव', इति स्वमतमादिशति स्म भगवान् दाशरथिः —

"ममापि तु विवक्षास्ति काचित्प्रति विभीषणम् ।
श्रोतुमिच्छामि तत्सर्वं भवद्भिरश्रेयसि स्थितैः ॥
मित्रभावेन संप्राप्तं न त्यजेयं कथंचन ।
दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम् ॥" -- इति ।

पुनरपि, "तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति" -- इति विशेषशास्त्रात्,

"प्रत्यक्षं लौकिकं वाऽपि दृश्यते सर्वराजसु ।
अमित्रास्तत्कुलीनाश्च प्रातिदेश्याश्च कीर्तिताः ।
व्यसनेषु प्रहर्तारः तस्मादयमुपागतः ॥'

इति तदभिमतसामान्यशास्त्राच्चायं परिग्राह्य एवेति श्रीरामवचनमाकर्ण्य, "अतिस्नेहः पापशंकी", इति न्यायेन श्रीरामप्रेमातिभूम्ना अस्य परिग्रहे किमनर्थमापतेदित्यस्थानभयशंकिनि सुग्रीवे लक्ष्मणेन सह रामं शरणमुपगम्य, "तस्याहं निग्रहं मन्ये"—इति बहुधा शरणागतपरिग्रहं प्रतिबध्नति सति भगवान् शरणागतवत्सलः श्रीरामभद्रस्तस्यातिशंकानिराकरणार्थं स्वस्य सर्वशक्तित्वं प्राचीकशत —

"पिशाचान् दानवान् यक्षान् पृथिव्यां ये च राक्षसाः ।
अंगुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर ॥"—इति ।

एवं सूक्ष्मधर्मज्ञानाभावात् प्रपन्नपरित्राणप्रतिकूलान् सुग्रीवादीन् सचिवान् समीचीनयुक्तिभिरनुकूलीकृत्य शत्रोरपि शरणागतस्य संरक्षणेऽस्य परमधर्मत्वं तदकरणे प्रत्यवायभूयस्त्वं च, "श्रूयते हि कपोतेन शत्रुरशरणमागतः ।"—इतीतिहासमुखेन प्रपञ्चयतो दाशरथेस्सकृत्प्रपन्नजन-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संरक्षणदीक्षितत्वं सुव्यक्तम् । स्वप्राणैरपि प्रपन्नरक्षणेच्छां प्रकटीचक्रे प्रभुः । अनेनास्याः प्रपत्तेस्सर्वाधिकारत्वं ध्वनितम् । अत एव वानर-वायसकपोतगजेन्द्रद्रौपदीप्रभृतयस्सिद्धिमविन्दन् । प्राणपरित्यागेनापि रक्षणीयश्शरणागतः,

"आर्तो वा यदि वा दृप्तः परेषां शरणागतः ।
अरिः प्राणान्परित्यज्य रक्षितव्यः कृतात्मना ॥
... ...
सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥" – इत्युक्तेः ।

अथोक्तरीत्या शरणागतसंरक्षणव्रतवतः शरण्यस्य श्रीरामभद्रस्य "परोपदेशे पाण्डित्यम्" – इति न्यायेन परोपदेशमात्रमन्तरा,

"आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया ।
विभीषणो वा सुग्रीव यदि वा रावणस्स्वयम् ॥"

इति तेनैव सुग्रीवेणाऽऽनायितस्य स्वपृष्ठं जेतव्यस्य रिपो रावणस्य बलाप-दानादिकं तत्त्वेन कथितवतः,

"राक्षसानां वधे साह्यं लंकायाश्च प्रधर्षणम् ।
करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम् ॥"

इति राक्षसवधं प्रतिजानतो मित्रश्रेष्ठस्य विभीषणस्य,

"इति ब्रुवाणं रामस्तं परिष्वज्य विभीषणम् ।
अब्रवील्लक्ष्मणं प्रीतस्समुद्राज्जलमानय ॥

तेन चेमं महाप्राज्ञमभिषिञ्च विभीषणम् ।
राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवमुक्तस्तु सौमित्रिरभ्यषिञ्चद्विभीषणम् ।
मध्ये वानरमुख्यानां राजानं रामशासनात् ॥"

इति तदौत्व एव लंकाराज्येऽभिषेचनात् उक्तव्रतस्य स्वानुष्ठानपर्यवसायित्वं द्योत्यते । "रामो द्विर्नाभिभाषते" खलु ! अत्राकृतेऽपि सेतुबन्धे, अतीर्णेऽप्यर्णवे, अप्राप्तेऽपि परपुरे, अजितेऽपि त्रिलोकजिति रावणे, अस्वाधीनेऽपि लंकाराज्ये विभीषणमभिषेचयतः श्रीरामस्यातिमानुषः प्रभावातिशयो ध्वन्यते ।

एवं चौर्येण स्वभार्यापहारिणं रावणं निगृहीतुं आगतस्य ससैन्यस्य राघवस्य मध्येपथं प्रासंगिकं शरणागतरक्षणादिकमभिहितम् । ततः स्वामिकार्यव्यग्राभ्यां मारुतिसुग्रीवाभ्यां सागरतरणोपायमनुयुक्तेन स्वशरणागतेः फलाविनाभावं दृष्टवता प्राज्ञेन विभीषणेन,

"समुद्रं राघवो राजा शरणं गन्तुमर्हति ॥"

इति समुद्रराजप्रसादार्थं तद्विषयकशरणागतिः कर्तव्यत्वेन सोपपत्तिकमभिहिता । तदंगीकृत्य, उपाया ह्यसमर्थेषु न फलन्तीति बोधयंश्च समुद्रं शरणं यातश्श्रीरामः । तदिदमाहुश्श्रीमद्वेदान्ताचार्यचरणाः — "प्रतिशयनभूमिकाभूषितपयोधिपुलिन" — इति । प्रतिशयनं नाम प्रायोपवेशः । स च यावत्कार्यसिद्धि सनियमविशेषं उपरोधनरूपमुपरोद्धव्यसमीपशयनम् । तद्भूमिकया नवांबुदेन रजताचलाधित्यकेव श्रीरामभद्रेण सागरवेला परभागातिशयमवाप ।

अथ श्रीदाशरथिना वानरसेनातरणार्थं उक्तरीत्या नियमेन त्रिरात्रोपासिते जलाशये पारावारे प्रसादमकुर्वति सति, कोपेन,

"क्षमया हि समायुक्तं मामयं मकरालयः ।
असमर्थं विजानाति धिक् क्षमामीदृशे जने ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चापमानय सौमित्रे शरांश्चाशीविषोपमान् ।
सागरं शोषयिष्यामि पद्भ्यां यांतु प्लवंगमाः ॥"

इति वाचा तं परिभर्त्स्य, पुनः,

"संपीड्य च धनुर्घोरं कम्पयित्वा शरैर्जगत् ।
मुमोच विशिखानुग्रान् वज्रानिव शतक्रतुः ॥"

इति प्रलयाग्निपरुषैर्बाणैः कैश्चिद्विक्षोभ्य, तथाप्यनधिगते प्रसादे ब्रह्मास्त्रेण तं शोषयितुमैच्छत्, "ब्राह्मेणास्त्रेण संयोज्य ब्रह्मदण्डनिभं शरम् ।" इत्युक्तेः । अथैवं ब्रह्मास्त्रप्रयोगभीते पयोनिधौ श्रीराममुपगम्य,

"पृथिवी वायुराकाशमापो ज्योतिश्च राघव ।
स्वभावे सौम्य तिष्ठन्ति शाश्वतं मार्गमाश्रिताः ॥"

इत्यादिभिरनुनयवचनैस्सान्त्वयित्वा स्वस्मिन् प्रयुक्तं ब्रह्मास्त्रं पापैराभीरदस्यु-प्रभृतिभिर्दुर्जनैर्दूषिते द्रुमकुल्याभिधे प्रदेशे पातयित्वा "हरीणां तरणे राम करिष्यामि यथा स्थलम् ।" - इत्युक्तरीत्या स्थलीकृते स्वात्मनि नलेन सेतुं कारयेत्युक्त्वाऽन्तर्दधाने सति, तेन सागरे सेतुर्बद्धः । तं सेतुं वीक्ष्याधुनाऽपि सर्वे जन्तवः षड्ऊर्मिबहुलं संसारजलधिमपि तरन्ति खलु! अनेन सागरशोषणोद्योगेन दण्डस्यैवानुग्रहीभवनमुच्यते । निग्रहस्याप्यनुग्रहीभवनेन श्रीरामस्य दयाप्रभावः प्रतिष्ठाप्यते । "क्रोधोऽपि तेऽनुग्रह एव संमतः ॥" इति कालियपत्न्यः कृष्णस्य तत्पतिजिघांसोदये । "परस्य दमकर्तुर्हि हिंसा केनात्र कल्प्यते ॥" – इति श्रीमद्भागवते । हितार्थं दण्डं करोति भगवान् । समुद्रेण प्रसादनोत्तरक्षण एव सुप्रसन्नो रामोऽभूदिति ऋषेर्विस्मयः । सागरविषयो महान् क्रोधः प्रणतसागरक्रोधानुगो भूत्वा तच्छत्रुषु प्रससार । प्रणतप्रतिकूलमूलघाती खलु तस्य प्रतिघः! प्रणमतां परतन्त्रः किल सः! अत्र रामः तत्क्रोधश्च किंकरत्वमुपयातः प्रपन्नस्य समुद्रस्य तच्छत्रुविषयतत्क्रोधस्य चेति चारु प्रदर्श्यते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सरित्पतिः सकृदवेक्षणात्तत्क्षणात् प्रकृष्टब्रह्महत्यापातकप्रशमहेतुना सेतुना व्यभज्यत च। सकृत्कृतश्शास्त्रार्थः। शरणागतिप्रस्तावे सर्वं क्षणमात्रनिर्वर्त्यम्। "सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति", — इति दर्शनस्यादृष्टार्थत्वं सर्वाभ्युपगतम्। "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" — इत्यमृतसेतुविषयोक्तमस्मिन् सेतावपि समानमिव। "अमृतस्यैष सेतुः" इति च श्रूयते। अत्र दयाया अत्यन्तमाविष्कारः। चक्रवर्तितनूजस्यावतरणं निरतिशयं हितं जगतः। "रामभूतं जगत्सर्वम्," इति राममयत्वमाप्यते जगता। यावत् स्थास्यन्ति गिरयस्तावद्रामायणकथा लोकेषु प्रचरिष्यति। शरणागतिप्रकाशनेन न्यस्यमानभरस्वीकरणेन चाकिंचनजनचिन्तामणी रघुधुरीणः। एतेनास्य कृपणजन्तुचिन्तामणेरतिमानुषत्वं चाविष्कृतम्।

अथ सेतुनिर्माणानन्तरं, "वानराणां हि सा तीर्णा वाहिनी नलसेतुना" — इत्युक्तरीत्या नलसेतुना वानरवाहिन्या समं समुद्रं तीर्त्वा सुवेलाचलोपशल्ये गरुडव्यूहमास्थाय अवस्थितस्वबलव्यवसायादिपरिज्ञानाय प्रासादमत्युन्नतमारुह्य शुकसारणाभ्यां चाराभ्यां प्रत्येकशो नामरूपबलवीर्यादिकथनपूर्वकं प्रदर्शितां वानरानीकिनीं अवलोक्य पुनश्शार्दूलनाम्ना चारेणापि, "सीतां वास्मै प्रयच्छाशु सुयुद्धं वा प्रदीयताम्॥" इत्युक्तिपूर्वं विज्ञापितं स्वव्यवसायादिकं विदित्वा किंचिज्जातोद्वेगतया मन्त्रिभिस्सम्मन्त्र्य माल्यवदादिभिरमात्यैः सहेतूपन्यासं,

"तन्मह्यं रोचते सन्धिस्सह रामेण रावण।
यदर्थमभियुक्ताः स्मः सीता तस्मै प्रदीयताम्॥"

इत्यादिविहितं हितोपदेशमनंगीकृत्य युद्धायैवोद्युक्तेन रावणेन कृतं लंकागुप्तिविधानादिकं विहंगरूपप्रतिच्छन्नैः विभीषणामात्यैरनलादिभिरवगत्य सुखवासाय लंकावलोकनाय च सुवेलाग्रमारोहता स्वेन समारूढे सुग्रीवे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लंकायां गोपुरशृंगेऽवस्थितं छत्रचामरादिभिरुपचारैरुपचरितं रावणं दृष्ट्वा क्रोधवेगेन सहसैवोत्प्लुत्य रावणं तं तृणीकृत्य तन्मकुटभङ्गमारचय्य कंचित्कालं नियुध्य तस्य इतः पूर्वं असंभावितं श्रममुत्पाद्य स्वस्य समीपमुपसेदुषि सति श्रीरामश्चन्द्रः ततः बहुविधानि युद्धचिह्नानि विलोक्य जवेन सुवेलाग्रादवतीर्य,

"तां सुरैरपि दुर्धर्षां रामवाक्यप्रचोदिताः ।
यथानिवेशं संपीड्य न्यविशन्त वनौकसः ॥"

इत्युक्तरीत्या वानरैर्लंकावरोधानन्तरम्,

"रामस्य धनुषश्शब्दं श्रोष्यसि त्वं महास्वनम् ।
शतक्रतुविसृष्टस्य निष्पेषमशनेरिव ॥"

इति सीतोक्तरीत्या धनुश्शब्देन लंकावधूजनस्य वेपथुलीलामुपदिदेश ।

एवं लंकामुपरुध्य उद्वेजयित्वा च, "नीतिमान्" – इत्युक्तरीत्या राजनीतिप्रवीणेन श्रीरामेण "सन्धिमिच्छन्ति साधवः" – इति न्यायेन

"अराक्षसमिमं लोकं कर्ताऽस्मि निशितैश्शरैः ।
न चेच्छरणमभ्येषि मामुपादाय मैथिलीम् ॥"

इति सीताप्रत्यर्पणेन सन्धित्सयाऽङ्गदमुखेन सन्दिष्टस्यापि रावणस्य दौरात्म्यमुपश्रुत्य,

"पीड्यमानां स धर्मात्मा वैदेहीमनुचिन्तयन् ।
क्षिप्रमाज्ञापयामास वानरान् द्विषतां वधे ॥"

इत्युक्तरीत्या मायाप्रयोगै राक्षसीपरुषभाषणैश्च पीड्यमानां सीतामनुस्मृत्य विलम्बाक्षमतया राक्षसवधार्थमाज्ञप्तैः हनुमदादिभिर्वानरवीरैर्जम्बुमालिप्रभृतीन् कांश्चन क्रव्यादयोधान्निहत्य प्रवर्तिते क्रमात् प्रवर्धमाने वानरराक्षससंग्रामे रात्रौ,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"इन्द्रजित्तु रथं त्यक्त्वा हताश्वो हतसारथिः ।
अङ्गदेन महाकायस्तत्रैवान्तरधीयत ॥"

इत्युक्तरीत्या अङ्गदनिर्जितेन क्रोधाविष्टेनान्तर्धानगतेनेन्द्रजिता श्रीरामलक्ष्मणौ नागपाशावपाशितौ विमोहितौ दृष्ट्वा वानरवाहिनी विषसाद । त्रिजटादयः वैदेहीं चाश्वासयामासुः । हरिवृषभस्सुषेणश्च श्रीरामलक्ष्मणयोश्चिकित्सार्थं सञ्जीविन्याद्यौषध्यानयनाय हनुमत्प्रेषणं मन्त्रयामास । एतस्मिन्नन्तरे परागतेन सञ्चरिष्णुमहामेरुसदृशेन गरुत्मता गरुदनिललवेन तावस्त्रबन्धाद्विमोचितौ । इच्छामात्रात्सर्वं संपादयितुं समर्थस्यापि श्रीरामस्य इन्द्रजित्कृतनागपाशानुवर्तनं लोके समुदाचारप्रवर्तनाय, तदवतारस्य धर्मसंस्थापनार्थत्वात् । एतेन प्राणापद्यपि न्यायमार्गप्रवृत्तानां सत्पुरुषाणामभ्युदयास्सर्वतः द्वारा भवन्ति । अतथाभूतानां तु हस्यगताप्यर्थसिद्धिरपसरतीति ध्वन्यते ।

अथ राहुमुक्तयोस्सूर्याचन्द्रमसोरिव नागबन्धविमुक्तयोः श्रीरामलक्ष्मणयोस्सन्दर्शनात् समुल्लसितहर्षाणां कपिकुलानां विश्रृङ्खलेन कोलाहलेन विदितरामादिवृत्तान्तेन क्रोधान्धेन पङ्क्तिकन्धरेण प्रेषितानामतिभीमपराक्रमाणां धूम्राक्षवज्रदंष्ट्राकंपनप्रहस्तादीनां सानुगानां बलाध्यक्षाणां वक्षःकवाटानि साटोपकोपावलेपैः हनुमदंगदनीलादिभिर्वानरकुंजरैर्विपाटितानि ।

अथैवं बहुविधराक्षससेनाध्यक्षमरणमाकर्ण्य, "रक्षोधिपः क्रोधवशं जगाम ।" – इति क्रोधपरवशः रावणः स्वयमेव रणभूमिमागत्य सुग्रीवगवयगवाक्षादीन् वानरवीरान् शरवर्षैः पराङ्मुखीकृत्य हनुमन्नीलविहितप्रधर्षद्विगुणितकोपः युद्धोन्मुखेन लक्ष्मणेन द्वन्द्वयुद्धं चकार । लाघवशालिना लक्ष्मणेन कृत्ते कार्मुके ब्रह्मदत्तयाऽमोघया गदया तमभि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हत्य तत्कर्मदर्शनक्रुद्धवायुपुत्रप्रहितेन वज्रकल्पेन मुष्टिप्रहारेण विसंज्ञीभूय मुहूर्तात्संज्ञां प्राप्य पुनः रामेण युध्यतो रावणस्य,

"अथेन्द्रशत्रुं तरसा जघान बाणेन वज्राशनिसन्निभेन।
भुजान्तरे व्यूढसुजातरूपे वज्रेण मेरुं भगवानिवेन्द्रः॥

यो वज्रपाताशनिसन्निपातान्न चुक्षुभे नापि चचाल राजा।
स रामबाणाभिहतो भृशार्तश्चचाल चापं च मुमोच वीरः॥

तं विस्खलन्तं प्रसमीक्ष्य रामस्समाददे दीप्तमथार्धचन्द्रम्।
तेनार्कवर्णं सहसा किरीटं चिच्छेद रक्षोधिपतेर्महात्मा॥"

इत्युक्तरीत्या भृशं विह्वलीकरणपूर्वं शिरश्छेदसदृशं किरीटभङ्गं कृत्वा तदात्वे तद्वधस्य ईषत्करत्वेऽपि तमुपेक्ष्य,

"कृतं त्वया कर्म महत्सुभीमं
हतप्रवीरश्च कृतस्त्वयाऽहम्।
तस्मात्परिश्रान्त इति व्यवस्य
न त्वां शरैर्मृत्युवशं नयामि॥

गच्छानुजानामि रणार्दितस्त्वं
प्रविश्य नक्तंचरराज लंकाम्।
आश्वास्य निर्याहि रथी च धन्वी
तदा बलं द्रक्ष्यसि मे रथस्थः॥

इत्युक्तरीत्या परिश्रान्तवधस्याधर्म्यत्वात् जीवग्राहं ग्रहणस्यौचित्यप्राप्तत्वेऽपि तदनादृत्य हस्तगतस्य शत्रोरपि विश्रमार्थं गमनाभ्यनुज्ञया करुणापराधीन-श्रीरामभद्रस्य विक्रमातिशयोऽनितरसाधारणो जगत्प्रसिद्धोऽभूत्। तत्तादृक्ष-रामचन्द्रः आर्द्रापराधाय मह्यं दयतां सदा।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं मकुटभङ्गादिना पराजित्य विसर्जितेन श्रीराघवबाणप्रभाव-स्मरणोदीर्णव्यथातिरेकेण रावणेन ब्रह्मवचनानरण्यनन्दीश्वरनलकूबरवेद-पतीपार्वत्यादिशापपर्यालोचनेन स्वानर्थप्राप्तिं निश्चित्यापि नियतिविधेयतया युयुत्सया महता प्रयत्नेन प्रबोध्य युद्धाय प्रेपितस्य पर्वताकारभीषणशरीर-तया कपीन् कान्दिशीकान् कुर्वतः सन्निहितान् तान् बुभुक्षया भक्षयतश्च युद्धे शैलशृङ्गाहतिविसंज्ञं सुग्रीवं गृहीत्वा लंकां प्रति गमनेन मध्येमार्गं प्रहृष्टयातुधानविधीयमाननिजशिशिरोपचारलब्धसंज्ञेन संज्ञाजानिसूनुना खरतरनखरदननिकृत्तकर्णनासिकस्य पुनः प्रतिनिवृत्य कपिकुलकदनं कुर्वाणस्य कुम्भकर्णस्य महागिरिनिकाशौ हस्तौ पर्वतकूटसन्निभं कुण्डला-लंकृतं शिरश्च दम्भोलिसदृशाशुगेन चकर्त श्रीचक्रवर्तितनूजः ।

अथैवं कुम्भकर्णे विदीर्णे रावणेन प्रेषितानां त्रिशिरोऽतिकायदेवा-न्तकनरान्तकमहोदरमहापार्श्वमत्तयुद्धोन्मत्तादीनां निशाचरवीराणां निधनं श्रुत्वा,

"अहो नु बलवान् रामो महदस्त्रबलं च वै ।
यस्य विक्रममासाद्य राक्षसा निधनं गताः ।
तं मन्ये राघवं वीरं नारायणमनामयम् ॥"

इत्यादिचिन्ताशोकसन्ततं तातमाश्वास्य रणरंगमभ्येत्य हनूमदादिप्रधानं वानरबलं रामलक्ष्मणौ च ब्रह्मास्त्राभिमन्त्रितैरायुधैर्विमोह्य सहर्षं लंकां प्रतियातः इन्द्रजित् । ततः जाम्बवद्वाक्यचोदितहनुमदानीतौषधाचलगन्धेन पुनर्जीवितं प्राप्तैर्विशल्यीकृतैः स्वातिसन्धानजनितकोपातिरेकदिनकर-तनयप्रोत्साहितैश्च वानरैरुल्कापाणिभिर्लंकोद्दीपनेनोद्दीपितः राक्षसपतेः कोपः । तेन यूपाक्षशोणिताक्षप्रजङ्घाकंपनैस्सह प्रहितयोः कुंभनिकुंभयोः निबर्हणं कृतं वानरोत्तमैः । ततो राघवेण खरपुत्रः मकराक्षः प्रमापितः । पश्चान्महेन्द्रजित् सकलकपिकुलकदनपूर्वकं मायासीतावधेनाङ्गनेयादीन् रामं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च वञ्चयित्वा दुर्जयदिव्यास्त्रोपलंभाय निकुंभिलायामाभिचारिकविधिना होतुं गतः। एतस्मिन्नवसरे परागतेन परमाप्तेन विदितारिमायेन विभीषणेन तन्मायाविधानाधिकं निवेद्य परिसान्त्व्य होमसमाप्तेरर्वागेवेन्द्रजिद्वधाय लक्ष्मणप्रेषणं विज्ञापितेन सीतापतिना निकुंभिलां प्रति प्रेषितलक्ष्मणानुगत-सकलकपिकुलकोलाहलोदीर्णक्रोधावेशान्धतया आभिचारिकहोमविधि-मसमाप्येव निर्गत्य युद्धसन्नद्धस्य मेघनादस्य सर्वास्त्राणामस्मिन्नकिंचित्करता-मालोच्य,

"सन्धाय धनुषि श्रेष्ठे विकर्षन्निदमब्रवीत्।
लक्ष्मीवान् लक्ष्मणो वाक्यमर्थसाधकमात्मनः॥
धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि।
पौरुषे चाप्रतिद्वन्द्वश्शरैनं जहि रावणिम्॥"

इति श्रीरामगुणरत्नानुसन्धानरूपदिव्यमन्त्रानुमन्त्रितेन परमास्त्रेण प्रमापण-मारचय्य विजयलक्ष्मीसमेत आगतस्सौमित्रिः। तादृशं भ्रातरं दृष्ट्वा,

"स तं शिरस्युपाघ्राय लक्ष्मणं लक्ष्मिवर्धनम्।
लज्जमानं वलात् स्नेहादङ्कमारोप्य वीर्यवान्॥
उपवेश्य तमुत्संगे परिष्वज्यावपीडितम्।
भ्रातरं लक्ष्मणं स्निग्धं पुनः पुनरुदैक्षत॥"

इत्युक्तरीत्या परमानन्देन दृढतरमालिङ्ग्य सुषेणेन विगतव्रणं कारयित्वा प्रहर्षभरितैर्वानरनिवहैस्सहर्षमवस्थितो दाशरथिः।

इत इन्द्रजिद्वधश्रवणोद्दीपितकोपकलुषकरणेन रावणेन एतादृश-विपत्तिनिमित्तभूता सीतेयमेव व्यापादनीयेत्यारब्धसीतावधोद्योगात् सुपार्श्वनामकराक्षससूक्त्या विरम्य शत्रुवधार्थं प्रेषितैरप्रमेयबलपराक्रमैर्मूल-बलाभिधैः [1] एकोनत्रिंशल्लक्षाधिकसप्तकोटिसंख्यासंख्यात रथ, [2] विंशति-

1. 7,29,00000. 2. 13,12,20000.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सहस्राधिकद्वादशलक्षोत्तरत्रयोदशकोटिसंख्यासंख्यात गज, [3] षष्टिसहस्राधिकविंशतिलक्षोत्तरदशकोटिसंख्यासंख्यात तुरग, [4] अशीतिलक्षोत्तरपंचचत्वारिंशत्कोट्यधिकशतकोटिसंख्यासंख्यात पदातिरूपैर्नैर्ऋतैस्सह श्रीरामः द्वन्द्वयुद्धं चकार। द्वन्द्वयुद्धं नाम द्वन्द्वीभूय युद्धम्। एकस्यैकेन युद्धमिति यावत्। अत्र श्रीरामस्यैकत्वेऽपि, "ते तु रामसहस्राणि रणे पश्यन्ति राक्षसाः॥" — इत्युक्तरीत्या गन्धर्वास्त्रप्रभावमोहितत्वेन,

"इति ते राक्षसास्सर्वे रामस्य सदृशान्रणे।
अन्योन्यं कुपिता जघ्नुः सादृश्याद्राघवस्य ते॥"

इति स्वानेव तदस्त्रमाहात्म्यात् रामवत्प्रतिभासमानान्,

"एष हन्ति गजानीकं एष हन्ति महारथान्।
एष हन्ति शरैस्तीक्ष्णैः पदातीन्वाजिभिस्सह॥"

इत्युक्तरीत्या एष रामः, अयं रामः इति राक्षसैरन्योन्यं द्वन्द्वशो योधनात् पुनः अस्य स्वाभाविकं परत्वं नितरां प्राकाशि। तथा चैतादृशाप्रतिद्वन्द्वपौरुषस्य स्वेतरस्मिन् कस्मिंश्चिदप्यसंभवात् स निस्समाभ्यधिक इति भावः। श्रूयते हि, "न तत्समश्चाभ्यधिकश्च दृश्यते, स्वाभाविकी ज्ञानबलक्रिया च" — इति। नन्विदमनुपपन्नं —

"अब्रवीच्च तदा रामस्सुग्रीवं प्रत्यनन्तरम्।
विभीषणं च धर्मात्मा हनुमन्तं च वानरम्॥

जाम्बवन्तं हरिश्रेष्ठं मैन्दं द्विविदमेव च।
एतदस्त्रबलं दिव्यं मम वा त्र्यंबकस्य वा॥"

इति श्रीरामेणैव शिवस्याप्येतादृशास्त्राभिज्ञत्वकथनादिति चेन्न, तत्कथनस्य मानुषभावनाधीनत्वात्। स्वरूपतस्तु,

---

3. 10,20,60000. 4. 1,45,80,00000.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"हुंकारेण महादेवः स्तंभितोऽथ त्रिलोचनः ।
जृंभितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः ।
अधिकं मेनिरे विष्णुं देवास्सर्षिगणास्तथा ॥
रुद्रस्त्रिणेत्रस्त्रिपुरान्तको वा"

इत्यादिवचनैरस्य त्र्यंबकसमधिकघोरास्त्राडंबरत्वमवगम्यते। यद्वा, एतादृशमस्त्रबलं दिव्यास्त्रप्रयोगचातुर्यं च ममैव "रुद्राणां शंकरश्चास्मि" इति मद्विभूतिभूतत्र्यंबकस्य कदाचित्संहारकाले भवतीति 'वा' पदस्यार्थः ।

अथ सकलमूलबलनिश्शेषवधात्,

"मम पुत्रो मम भ्राता मम भर्ता रणे हतः ।
इत्येवं श्रूयते शब्दो राक्षसानां कुले कुले ॥
न तं पश्यामहे लोके यो नश्शरणदो भवेत् ।
राघवेणोपसृष्टानां कालेनेव युगक्षये ॥"

इत्याद्युक्तरीत्या स्वस्ववन्धुवधजनितातिकरुणकर्णारुन्तुदराक्षसीविलपनवचनश्रवणोदीर्णकोपज्वाले स्वेन साकमनीकमुपगतान् विरूपाक्षमहोदरमहापार्श्वान् अवशिष्टयातुधानप्रधानान् सुग्रीवाङ्गदाभ्यां सूदितानवलोक्य महता संरंभेण शक्त्याऽनिवार्यया सौमित्रिं समभिहत्य बलकदनं कुर्वाणे रावणे, तत्कर्मासहमानेन श्रीरामेण हनुमदानीतोषधिगिरिशिखरस्थदिव्यौषधिरसेन सुषेणेन लक्ष्मणं विरुजीकृत्य, पाकशासनप्रहितं सपरिकरं मातल्यानीतं दिव्यं स्यन्दनमधिरुह्य महता दुर्निवारेण, "हन्यमानो दशग्रीवो विघूर्णद्हृदयोऽभवत् ॥" — इत्युक्तरीत्या व्याकुलीकृते सति, तद्दुर्दशामवलोक्य अपवाहितरथं सारथिं प्रति शत्रुणाऽपि तेन रामस्य विक्रमश्लाघनं कृतम् । लोके क्षुद्रैरपि राजभिः प्रबलेषु स्वविरोधिषु विद्यमाना अपि पराक्रमादयो गुणाः नाभ्युपगम्यन्ते । अभ्युपगता अपि, कियदेतदित्यवधीर्यन्ते, अनवधीरिता अपि वाचा न स्तूयन्ते । अस्य रामस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पराक्रमातिशयस्तु सकलरिपुकुलदुर्निवारवरबलभुजबलविद्रावितासिलसुरासुरनिकरेण यथार्थनाम्ना रावणेन शत्रुणाऽपि, "रिपोः प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमैः।"—इति संश्लाघितः। एवं विरोधिनाऽपि संश्लाघ्यविक्रमादिगुणाकरं रमयतां वरं रामं विनाऽन्यं को नाम भजेत।

अथात्रान्तरे सुरगणैस्सह सङ्गरदर्शनाय समागतेनागस्त्येन महर्षिणोपदिष्टादित्यहृदयस्तोत्रानुसन्धानोन्मिषितहर्षस्य निजविजयाशंसिशुभनिमित्तदर्शनसमुपजातरणौत्सुक्यस्य रामभद्रस्य दारुणदुर्निमित्तदर्शनेन निजमरणनिश्चयाद्वीर्यसर्वस्वमपि दर्शयतो दुरात्मनो दशमुखस्य च महति रोमहर्षणे रणे प्रवर्तमाने सत्युभयस्यामपि सेनायां प्रगृहीतप्रहरणमेव तत्तादृशयुद्धवैचित्रीविलोकनविस्मयस्तिमितायां सत्यां, अमरगणे चाश्रुतदृष्टचरमायोधनमालोक्य प्रशंसावचनमुखरमुखे सति,

"एवमेकशतं छिन्नं शिरसां तुल्यवर्चसाम्।
न चैव रावणस्यान्तो दृश्यते जीवितक्षये॥"

इत्युक्तरीत्या दशमुखशिरसां एकशतवारविच्छेदनेऽपि पुनः पुनरुदयमालोक्य तद्बधोपायचिन्तनावसरे, महेन्द्रसारथिमातलिस्मारितेन महानुभावेन श्रीरामेण ब्रह्मास्त्राभिमन्त्रितेन भास्वरेण बाणेन परदाराभिमर्शपांसुले पुलस्त्यकुलदूषणे रावणे विनिहते सति, परिमितेतरप्रहर्षपरवशैस्त्रिदशैः प्रवर्तितेन देवदुन्दुभिनिनादेन सह सुखस्पर्शसुगन्धवहगन्धवाहानुकूलितेन दिव्यपुष्पवर्षेणायं सभाजितः। सुचिरकांक्षितदुर्वृत्तरावणसंहारात् सन्तुष्टैस्सुरनिकरैस्सदुन्दुभिनिर्घोषं पुष्पवृष्टिः श्रीराघवरथोपरि नितान्तमभिवृष्टेति भावः।

अथोक्तरीत्या रावणवधानुवादपुरस्सरं प्रियतमविपत्तिजनितशोकातिरेकार्तानां मन्दोदरीप्रमुखानां दशमुखान्तःपुरसुन्दरीणां परिदेवनावसरे, तत्र मन्दोदरीविलपनवचनविषयीभूतैरखिलोपनिषदंगनाशेखरायमाणैर्भगव-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दसाधारणैः कल्याणगुणैरस्य श्रीरामस्य नारायणात्मकत्वमभिव्यज्यते । चिराभिलषितनिजमनोरथलाभपरमहर्षिभिः महर्षिभिः निगमाशिखरमुखैः संश्लाघितश्चायं दाशरथिः । एतेनाप्यस्य सर्वोत्तमत्वाभ्यासो व्यंजितो भवति ।

अथैवं रणांगणे दीर्घनिद्रावशं प्राप्तस्य भ्रातुः पौलस्त्यस्यावार्यरघुवर्यनियोगादनुष्ठितौर्ध्वदैहिकविधिना पुनर्निस्सपत्नं लंकाराज्येऽभिषिक्तेन विभीषणेनाप्ततमेन हनुमदावेदितस्वभर्तृविजयश्रवणसञ्जातपरमानन्दभरितायां तन्मुखावलोकनायोत्कण्ठमानायामानीतायां सीतायां लोकापवादपरिजिहीर्षुणा रामेणोपेक्षितायां अत एव चारित्रप्रतिज्ञां विधाय हुताशनं प्रविशन्त्यां सत्यां तदात्वे समुपागतैः महेन्द्रादिभिर्लोकपालैः ब्रह्मरुद्रादिभिश्चावितथस्तुतिवचनैराराधितो भगवान् दाशरथिः । एतेनाप्यस्य परत्वाभ्यासः प्रपंचितः । एवमिन्द्रादिसुरगणैः,

"कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे ।
उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा ॥"

इति स्तुते सति, श्रीराघवेण लोके स्वप्रभावप्रकाशनार्थं स्वयमजानतैव,

"योऽहं यस्य यतश्चाहं भगवांस्तद्ब्रवीतु मे ।"

इति स्वस्वरूपादिकथनाय चोदितेन ब्रह्मविदां वरेणापि ब्रह्मणा,

"भवान्नारायणो देवः श्रीमान् चक्रायुधो विभुः ।" इत्युपक्रम्य,

"सीता लक्ष्मीर्भवान्विष्णुः देवः कृष्णः प्रजापतिः ॥"

इत्यन्तेन यत्किंचिदेव यथास्वमतिविदितं कथितम् । न तु कात्स्न्र्येन स्वरूपस्वभावादि, तस्यापरिच्छेद्यत्वात्, "सोऽङ्ग वेद यदि वा न वेद" "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" — इत्यादिश्रुतेः । इदमुच्यते श्रीमद्वेदान्तगुरुशेखरैरपि, "अमितमतिविधिविदितकथितनिज-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विभवजलधिप्रुषतलव",—इति तद्वद्ये ।

"इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात् ।
मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात् ॥"—इत्यादिस्मृतिश्च ।

यथाहुश्रीमद्यामुनाचार्याश्च —

"तत्त्वेन यस्य महिमार्णवशीकराणु-
इशक्यो न मातुमपि शर्वपितामहाद्यैः ॥"—इति ।

एवं च मितंपचमतयो मादृशाः किमुत तद्गुणवर्णने । तत्र प्रवृत्तिस्तु चापलादेवेति तदीया दयैवास्माकमवलम्बनम् ।

उक्तरीत्या श्रीरामेण स्वस्वरूपादिकथानुयोगपूर्वं ब्रह्ममुखात्तच्छ्रवणं लोके स्वप्रभावप्रख्यापनद्वारा सीताया निर्दोषत्वप्रत्यायनार्थमेव, न त्वनिदं-वित्त्वेन स्वस्य तत्सकाशात्परिज्ञानार्थम् । "यस्सर्वज्ञस्सर्ववित्",—"यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः ॥" — इत्यादिश्रुतिस्मृतिभिस्तस्य सर्वज्ञत्वावगमात् । तथा च सीताचारित्रादिकस्य स्वेन सम्यक् ज्ञातत्वेऽपि परुषभाषण-तदुपेक्षण-तदात्वोपागत ब्रह्मादिकथित स्वस्वरूपादिश्रवणादिकं कौलीननिरसनद्वारा लोकाराधनार्थमेव । तथा च श्रीरामायणवचनानि,

"अवश्यं त्रिषु लोकेषु न सीता पापमर्हति ।
दीर्घकालोषिता सीता रावणान्तःपुरे शुभा ।
बालिशः खलु कामात्मा रामो दशरथात्मजः ॥" इत्यारभ्य

"अनन्या हि मया सीता भास्करेण प्रभा यथा"

इत्यन्तम् । एतेनास्य परब्रह्मात्मकत्वं नितरां निर्व्यूढम् ।

अथैवं ब्रह्मादिबृन्दारकपरिषदा श्रीसीतारामयोः स्वरूपादिकथने यथावत्कृते सति, श्रीसीतागुणगणवर्णनपूर्वकं कर्मसाक्षिणा हव्यवाहेन जनकेनैव प्रत्तां तथारूपां पतिदेवतामणिं मैथिलीं प्रतिलभ्य प्रहर्षभरितस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामभद्रस्य प्रार्थनया चिरकांक्षितदारुणतररावणवधजनितप्रमोदातिशयवता मघवता रावणवधसहायभूतानां वीरशयनशायितानां वानरवीराणां समुज्जीवनं नीरुजीकरण तद्वासस्थलीयतात्कालिकफलमूलोदकसमृद्ध्यादिकं च कृतं। अनेन, "आनृशंस्यं परो धर्मः", इत्युक्तमानृशंस्यं नितरां प्रकाशितम्। तथा च रावणहस्तगमनलंकापुरनिवासादयस्सर्वेऽपि व्यापारा भगवतो रामभद्रस्येव तत्सहधर्मिण्यास्सीतादेव्या अपि लोकानुग्रहार्थं स्वसंकल्पसिद्धा एव। यथोच्यते श्रीरामायणे—

"इमामपि विशालाक्षीं रक्षितां स्वेन तेजसा।
रावणो नातिवर्तेत वेलामिव महोदधिः॥"

इत्यादि। एतत्सर्वं "सहधर्मचरी" — इति पदेन प्राधान्येनाभिव्यञ्जितम्।

अथ श्रीरामायणे,

"अहं हत्वा दशग्रीवं सप्रहस्तं सबान्धवम्।
राजानं त्वां करिष्यामि ... ...॥"

इति पूर्वप्रतिज्ञातरीत्या वयस्यवराय विभीषणाय लंकाराज्यं प्रतिपादितम्। तदुच्यते श्रीमदाचार्यपादैः "विभीषणवशंवदीकृतलंकैश्वर्य", इति। अत्र 'वशंवदीकृत' — इत्यनेन विभीषणाय लंकाराज्यदानं न स्वार्जितस्य शत्रुराज्यस्य स्वप्रतिनिधिभूतेऽभिमते पुरुषे पालनार्थं न्यासतया दानरूपम्; अपि तु स्वस्वत्वनिवृत्तिपूर्वकतत्स्वत्वापादनरूपमेवेति द्योत्यते। यद्यपि लंकाराज्यं दायक्रमेण तदीयत्वान्न रामेण प्रतिपादनमपेक्षते, तथाऽपि तस्य विभीषणेन, "परित्यक्ता मया लंका" — इति स्वकीयत्वनिवर्तनात् रामेण विजितत्वाच्च, साहाय्यकारिणे तस्मै तेन प्रतिपादनं न्याय्यमेव। अनेनास्य, "अनृतं नोक्तपूर्वं मे, रामो द्विर्नाभिभाषते" — इत्याद्युक्तं सत्यसन्धत्वमवबोधितम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथाऽस्य रामभद्रस्य रावणादिवधार्थं शरणागतानां देवगणानां अभिमतार्थकरणात् कृतकृत्यता निष्पन्ना। अत्र "निर्वृत्तं नः प्रयोजनम्" इत्यादि श्रीरामायणम्। "खपुष्पितारिपुपक्ष" इति श्रीमदाचार्यपादाः। निश्शेषनिर्मूलितशत्रुपक्षत्वात् उपपद्यत एवास्य निष्पन्नकृत्यत्वम्। अथ विनीतविभीषणोपस्थापितेन उपपन्नगुणेन पुष्पकाभिधानेन विमानेन विभीषणसत्कृतैस्सुग्रीवादिवानरनिकरैस्सह सीतायै निजोत्संगमलंकुर्वाणायै तत्तत्स्थलप्रदर्शनपूर्वकं,

"तं तु मे भ्रातरं द्रष्टुं भरतं त्वरते मनः"

इति शुभरतभरतावलोकनोत्कण्ठया द्रुततरमयोध्यां प्रति गमनं कृतं भगवता रामभद्रेण। दवीयानप्ययोध्यापुराकाशमार्गावकाशः पुष्पक-वेगान्नेदीयानभवत्।

अथ आगमनसमये भरद्वाजाश्रमेऽनिवार्यतदाज्ञया तां रात्रिमुषित्वा हनुमदावेदितभ्रात्रागमनश्रवणसंजातप्रहर्षभरभरितेन भरतेन सपौरजनं प्रत्युद्गमनाभिवादनन्यासभूतराज्यसमर्पणपूर्वकमुपचरितस्य तादृशभरतसमा-गमसमुपजातामन्दानन्दस्य,

"ततस्स प्रयतो वृद्धो वसिष्ठो ब्राह्मणैस्सह।
रामं रत्नमये पीठे सहसीतं न्यवेशयत्॥

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः।
कात्यायनो गौतमश्च सुयज्ञो विजयस्तथा॥

अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना।
सलिलेन सहस्राक्षं वसवो वासवं यथा॥"

इत्युक्तरीत्या वसिष्ठाद्यनुष्ठितपट्टाभिषेकवैभवं — "ततस्तयोरभिषेक-मङ्गलं मैत्रेय वर्षशतेनापि वक्तुं न शक्यते" — इति देवतापारमार्थ्य-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वित्पराशरब्रह्मर्षिपरिपाणितरीत्या अवाङ्मनसगोचरम्। तथा च साकेत-राज्याङ्गीकरणेन सफलीकृतं भरतप्रपदनम्।

एवमस्य क्षोणीकोणशतांशैकदेशभूते साकेतराज्ये पट्टाभिषेचनं कोटीश्वरस्य वराटिकादानमिव, सकलभुवनधुरीणस्य कल्याणशिखरिणः स्वसदनपटलाधारस्तंभीकरणचिन्तनमिव चात्यन्तानुचितम्, तस्य स्वतस्सर्व-जगदधीश्वरत्वात् इत्यभिप्रयन्त आचार्याः अस्य श्रीरामभद्रस्य स्वतस्सिद्धम् सर्वजगत्स्वामित्वमनुसन्दधते "स्वामिन्",--इति। अत्र प्रतियोग्यनिर्देशेऽपि सर्वस्यापि जगतः स्वामिन्निति लभ्यते, असंकोचात्। एवमपि,

"यावदावर्तते चक्रं यावती च वसुन्धरा।
तावत्त्वमिह सर्वस्य स्वामित्वमनुवर्तय॥"

इति भरतः। "अखिलजगत्स्वामिन्, अस्मत्स्वामिन्", इति श्रीमद्भाष्य-काराश्च। एतेनाप्यस्य परत्वमुक्तम्।

सर्वस्मात्परस्यापि भगवतः एवमवतारः आश्रितसंरक्षणाद्यर्थ इति तृषितपानीययाचनन्यायेन पुनरप्याहुश्श्रीमदाचार्यचरणाः, "राघव-सिंह", -- इति। रघोर्वंशापत्यं पुमान् राघवः, स सिंह इव राघवसिंह इति संबुद्धिः। शरणागतिधर्मपरिपालनधुरन्धररघुकुलसमुत्पन्ननरवरश्रेष्ठ इति भावः। 'स्वामिन्', 'राघवसिंह',--इति गद्याभ्यां परत्वसौलभ्ये उक्ते। सहपरिपठनं चाविनाभूतयोरेवानयोरुपकारद्योतनार्थं; यथाहु-श्श्रीमदाचार्यपादाः,

"परत्वं सुलभत्वेन रहितं नोपकारकम्।
सुलभत्वं तथा तेन रहितं नोपकारकम्॥"

इति। अशेषजगत्स्वामिन्, राघवपुङ्गव, श्रीसीताविभो, अस्मत्कुलदैवत, श्रीराम! जय जय॥

इति श्रीमद्युद्धकाण्डार्थसंग्रहः समाप्तः॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ श्रीमदुत्तरकाण्डार्थसंग्रहः ॥

अथैतावता प्रबन्धेन आश्रितसंरक्षणाद्यर्थं भगवतस्सवितृवंशावतीर्णस्य प्रधानसाधुपरित्राणाङ्गभूतदुष्कृन्निरसनमभिवर्ण्य, धर्मसंस्थापनमुत्तरकाण्डेऽभिधीयते । तावत् यथावत्पट्टाभिषेकानन्तरं, तद्गुणगणाकृष्टैः तत्सभाजनार्थं सकलदिग्भ्यस्समागतैः कथितरावणाद्युत्पत्तिबलादिवृत्तान्तैर्महर्षिसङ्घैः —

"न चान्यो राक्षसान् हन्ता सुरारीन् देवकण्टकान् ।
ऋते नारायणं देवं शङ्खचक्रगदाधरम् ॥
भवान्नारायणो देवः .. ... ।"

इत्यादिभिः प्रशंसितः रघुकुलभूषणः श्रीरामः,

"तथा परिवृतो राजा श्रीमद्भी ऋषिभिर्वृतः ।
राजभिश्च महावीरैः वानरैश्च सराक्षसैः ॥
यथा देवेश्वरो नित्यं ऋषिभिस्समुपास्यते ।
अधिकः स्वेन रूपेण सहस्राक्षाद्विरोचते ॥"

इत्युक्तरीत्या आस्थान्यां सातिशयं विराजमानश्श्रीरामचन्द्रः चारविदितचरितेन भरतेन रावणवधार्थमुद्योजितैः,

"अक्षौहिण्यो हि तत्रासन् राघवार्थे समुद्यताः ।
भरतस्याज्ञयाऽनेकाः प्रहृष्टबलवाहनाः ॥"

इत्युक्तरीत्या अयोध्यायां वर्तमानैरनेकै राजश्रेष्ठैस्संसेवितश्च । तदाहुः श्रीमन्निगमान्तगुरुशेखराः; — "हाटकगिरिकटकलडहपादपीठनिकटतटपरिलुठित निखिलनृपति किरीटकोटि विविध मणिगणकिरणनिकरनीराजितचरणराजीव", — इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पट्टाभिषिक्तं राजानं कुलकन्यकाश्शान्त्यर्थं मङ्गलदीपिकाभिर्नीराजयन्ति, तदवरा राजानश्च तं प्रणमन्तीति समुदाचारः। तदुभयमप्यनेन संगृहीतम्। तथा च पट्टाभिषेकमहोत्सवानन्तरं महास्थानगीतस्य श्रीरामस्य पादपीठान्तेऽहमहमिकया प्रणमतां पार्थिवानां मणिकिरीटेभ्यो मिथस्सङ्घट्टनात् विशीर्णानां नवरत्नानां कान्तिप्ररोहाः कुलकन्यकाभिः क्रियमाणाः नीराजनोपचारा इवाशोभन्त इति भावः।

अथ कियानयमुपचारः, परमयोगिवाङ्मनसापरिच्छेद्यस्वरूपस्वभावस्वाभिमत विविध विचित्रानन्तभोग्यभोगोपकरणभोग्यस्थान समृद्धानन्ताश्चर्यानन्त महाविभवानन्तपरिमाणनित्यनिरवद्य निरतिशय श्रीवैकुण्ठनाथस्य, तादृशनित्यसूरिसङ्घसंसेवनीयचरणारविन्दस्य भगवतो रामभद्रस्य इत्यभिप्रायेणाहुश्श्रीमदार्यचरणाः,- "दिव्यभूमाऽयोध्यार्धदैवत", इति।

अथ भगवतस्स्वावतारपवित्रीकृतवर्णानुगुणं यथावद्वर्णाश्रमधर्मपरिपालनेन धर्मसंस्थापनं कुर्वाणस्य श्रीरामस्य,

"राजवंशान् शतगुणान् स्थापयिष्यति राघवः॥"

इत्युक्तरीत्या तादृशराजवंशप्रतिष्ठापनमाहुराचार्याः, "पितृवधकुपितपरशुधरमुनिविहितनृपहननकदनपूर्वकालशतगुणप्रतिष्ठापित धार्मिकराजवंश",- इति। तथा च कृतयुगे उत्पन्नाः मध्ये जामदग्न्यकृतेन त्रिस्सप्तकृत्वः क्षत्रियहननेन उत्सन्नप्राया धार्मिका राजवंशाः पञ्चमत्रेतायुगद्वापरयुगसन्धौ समवतीर्णेन श्रीदाशरथिना रामेण शतगुणं प्रतिष्ठापिता इति भावः। त्रेतायुगस्यादौ श्रीपरशुरामावतारः। तदुक्तं महाभारते,

"त्रेतायुगे भविष्यामि रामो भृगुकुलोद्वहः।
क्षत्रं चोत्सादयिष्यामि समृद्धबलवाहनम्॥"

इति। तत्कालेऽप्यधर्मोऽभवदिति ज्ञायते, यतः क्षत्त्रमुत्सादितवान् जामदग्न्यः। रोषाकरस्स जामदग्न्यो रामः क्षत्त्रमुत्सादयामास।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

करुणाकरोऽयं दाशरथी रामस्तु अराजकजनपदत्वप्रयुक्तदोषव्युदासाय तानप्रच्युतधर्मकानेव शतगुणं प्रतिष्ठापयामास। अहो अस्यानृशंस्यम्।

अथ "निर्जित्य परसैन्यानि, क्षितिं धर्मेण पालयेत्" इत्युक्तरीत्या कदाचित् निजमातुलयुधाजित्प्रार्थितस्य भ्रातुर्नियोगान्मातुलेन सह सिन्धुनामकनदोभयकूलवर्तिषु गन्धर्वविषयेषु वर्तमानान् तज्जात्यनुरूपव्यापाराभिरतान् विधाय भागद्वयात्मकेषु तेषु देशेषु स्वपुत्रौ तक्षपुष्कलौ प्रतिष्ठाप्य पुनरयोध्यां प्रत्यागतेन भरतेन विरचितपादोपसेवनस्य भगवतो रामभद्रस्य गुणगणाः तैर्गन्धर्वैस्संस्तुताः।

पुनरपि जातुचित् श्रुतरावणादिवृत्तान्तैर्यमुनातीरवासिभिर्भार्गवच्यवनादिभिर्महर्षिभिरभ्यागत्य तापसजनोपद्रवकारिणो मधुसुतस्य लवणासुरस्य वधार्थं प्रार्थनायां कृतायां भ्रातृनियोगनिघ्नेन शत्रुघ्नेन मधुरापुरेऽप्रमेयेन वैष्णवेन शरेण तं निहत्य तत्कर्मसन्तुष्टदेवगणानुग्रहप्रतिपन्ने तत्रैव मधुरानगरे कांश्चन वत्सरान् प्रजापरिपालनं विधाय, श्रीरघुवरचरणारविन्दसेवाविरहासहतया पुनरयोध्यां प्रत्येत्य श्रीरामभद्रस्संसेवितः। एवं चास्य सौभ्रात्रनिदर्शनभूतैस्सर्वात्मना ज्येष्ठानुवर्तनैकतत्परैर्भरतादिभिर्भ्रातृभिर्नित्योपासितत्वोक्त्या तैः पृथग्राज्यापेक्षायां संभाव्यमानद्वैराज्यदोषप्रसंगलेशोऽपि नाभवदिति व्यज्यते।

अथास्य श्रीरामभद्रस्य अश्वमेधानुष्ठानावसरे, शिष्यैस्समं समागतस्य श्रीवाल्मीकिमहर्षेर्नियोगात् कुशलवाभ्यां गीयमानस्य निजचरित्रनिबन्धनस्य श्रवणेन निर्वृतिरासीत्। एवं च सीतापरित्यागानन्तरं तद्विरहासहस्य श्रीरामस्य विरहविनोदनार्थं तदीयचरित्रश्रवणं संगच्छतेतराम्। विरहिणो हि स्ववल्लभाचरित्रगाथाश्शृण्वन्ति श्रावयन्त्यपीत्येके। अन्ये तु एवंविधनायकस्य विरहावस्थायामपि न सदसि स्वकीयकान्तावृत्तान्तश्रवणं युक्तरूपं, किन्तु रहसि नितान्तमन्तरङ्गभूतेभ्यस्सुहृत्प्रभृतिभ्य एव, अति-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गम्भीरप्रकृतित्वात् । "गांभीर्यमविकारस्स्यात् सत्यपि क्षोभकारणे", – इति गाम्भीर्यलक्षणं च । अपरे चाहुः; – नाप्यत्र धीरोदात्तत्वविरुद्ध-विकत्थनत्वादिदोषस्संभवति, न तु समुचितावसरे स्वगुणकथने, अन्यैर्वा यथादृष्टार्थवादिभिरभिहितस्य स्ववृत्तान्तस्य श्रवणे, अन्यथा, "जगत्समस्तं परिवर्तयाम्यहं, पिशाचान्दानवान् यक्षान् पृथिव्यां ये च राक्षसाः । अंगुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर ॥ अद्य रामस्य रामत्वं पश्यन्तु हरियूथपाः ॥" – इत्यादौ स्वगुणकथनं, "भवान्नारायणो देवः ... ॥" – इत्यादिब्रह्मादिकृतस्वस्वरूपगुणविभवैश्वर्यादिस्तुतेश्च श्रवणमत्यन्तानुचितमेव स्यात् इति । इतरे तु, "सीतायाश्चरितं महत्", इत्यपि न प्राधान्येन व्यवहारप्रयोजकम् । अपि तु प्रबन्धनायिकात्वेन तस्या अपि चरित्रसंबन्धित्वमात्रप्रतिपादनपरम् । अत एव, "कुरु रामकथां पुण्यां...", "रघुवरचरितं मुनिप्रणीतं", "रामस्य चरितं कृत्स्नं..." इत्यादिव्यवहारो भूयसांन्यायमवलम्बते — इत्याहुः ।

वस्तुतस्तु स्वावतारस्य धर्मसंस्थापनादिफलकत्वात्, तत्र स्वानुष्ठान-मुखेन लोके प्रवर्तितं धर्मं स्वावतारसमाप्त्यनन्तरमपि लोकावबोधनार्थं प्रबन्धमुखेनापि प्रवर्तयितुकामस्य रामस्य स्वसंकल्पात् स्वतो निर्भात-भारतीकेन वाल्मीकिना महर्षिणा प्रणीतस्य यथावत् स्वचरितप्रतिपादकस्य प्रबन्धस्य,

"अथ कर्मान्तरे राजा समाहूय महामुनीन् ।
पार्थिवांश्च नरव्याघ्रः पण्डितान्नैगमांस्तथा ॥
पौराणिकान् शब्दविदो ये च वृद्धा द्विजातयः ॥"

इत्याद्युक्तरीत्या सम्यक्त्वनिर्णयाय सर्वज्ञैस्सभिकैस्सह श्रवणं, तेन स्व-संकल्पितार्थनिष्पत्त्या निर्वृतिश्च । तस्मान्न काप्यनुपपत्तिः । एतेन, "ममापि तद्भूतिकरं प्रवक्ष्यते" इत्येतदपि निर्मूलं इति वदन्ति । अत्र यथो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चितं ग्राह्यम्। श्रीरामचरितस्य तादृशकविवररचितत्वोक्त्या सर्वातिशायित्वं द्योत्यते। तादृग्विधकविवररचितस्य स्वीयचरितनिबन्धनस्य श्रवणेन निर्वृतैस्सर्वैरपि जनैस्संमानितोऽयम्। श्रीरामभद्रगुणानाकृष्टः कश्चिदपि नाभवत्। तथा च,

"चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितम्॥"

इत्युक्तरीत्या तत्तत्कालसंभूततया सुचिरकालनिर्वृत्तमपि चरितं प्रत्यक्षतया अनुभूयमानमिव सहृदयहृदयेषु समर्पयतः कुशलकुशलवाभिगीयमानस्य वाणीकेलिगृहायितेन आदिकविना भगवद्वाल्मीकिमहर्षिणा निबद्धस्य श्री रामभद्रचरितस्य सम्यगनुभवेन तद्गतमहार्घगुणरत्ननिकराणां स्मारंस्मारं मोमुद्यमानैस्सर्वैरपि जनैस्सम्मानितस्यास्य गुणातिशयो निस्समाभ्यधिक इति व्यज्यते।

अथ सौभ्रात्रैकनिकेतनैश्शुभरतैर्भ्रातृभिस्संसेवितेन प्रजाः धर्मेण परिपालयता प्रमोदभरितेन भगवता दाशरथिना रावणं विजित्यायोध्याप्राप्त्यनन्तरं यथापुरं कुबेरोद्वहनाय प्रहिते, प्रीतेन तेन पुनरपि स्वोपासनार्थमनुज्ञाते कदाचिदपराह्णसमयेऽयोध्यामागत्य वृत्तान्तनिवेदनपूर्वकं आत्मपरिग्रहं अर्थयमाने पुष्पकाभिधाने विमाने धनदानुकूल्येनांगीकृत्य शंबूकवधानन्तरं तस्मा एव पुनर्दत्तीर्णे सति, तेनास्य यशस्सर्वलोकविख्यापितमभवत्। अत्र,

"अथापराह्णसमये भ्रातृभिस्सह राघवः।
शुश्राव मधुरां वाणीं अन्तरिक्षाद्विनिस्सृताम्॥
सौम्य राम निरीक्षस्व सौम्येन वदनेन माम्।
कुबेरभवनात्प्राप्तं विद्धि मां पुष्पकं प्रभो॥" इत्यारभ्य,

"पूजयित्वा महाबाहू राघवः पुष्पकं तदा।
गम्यतामिति चोवाच आगच्छ त्वं स्मरे यदा॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यन्तम्, स्थलान्तरे,

"ततोऽर्धदिवसे प्राप्ते पूज्यमानस्ततस्ततः ।
अयोध्यां प्राप्य काकुत्स्थो मध्यकक्ष्यामवारुहत् ॥

ततो विसृज्य रुचिरं पुष्पकं कामगामि तत् ।
विसर्जयित्वा गच्छेति स्वस्ति तेऽस्त्विति च प्रभुः ॥"

इति च श्रीमद्रामायणवचनानि भाव्यानि ।

अथ कदाचित् कस्मिंश्चिज्जानपदे ब्राह्मणवृद्धे अप्राप्तयौवनमेवावसन्नायुषमात्मजनुषमादाय राजद्वारि, "राज्ञोऽस्य रामस्य दोषेणैव मम पुत्रकोऽयं बाल एव मृतः, अहमपि पत्न्या सममत्रैव पुत्रशोकान्मरिष्यामि", इति सोपालम्भवचनमुपरुन्धति सति, तदा, "तव विषये कलियुगमात्रतपोधिकारमद्योग्रे तपसि वर्तमानं शूद्रमन्विष्याहनिष्यश्चेत्, तर्ह्ययं मृतो बालकोऽजीविष्यदि"ति नारदोदीरितां भारतीमाकर्ण्य स्मरणमात्रसन्निहितं पुष्पकमारुह्य तमन्विष्य दक्षिणस्यां दिशि कस्यचित्सरसस्तीरे अधोमुखं लम्बमानस्य सहशरीरेण स्वर्गप्राप्तिकामनया तपोनिरतस्य शम्बूकाख्यस्य शूद्रस्य शिरश्छेदेन श्रीरामभद्रेण ब्राह्मणपुत्र उज्जीवितः ।

एवमल्पीयसोऽप्यधर्मस्य निरोधेन महीयसो धर्मस्य प्रतिष्ठापनेन यथावत् वर्णाश्रमधर्मपरिपालनेन च, "राजा कालस्य कारणम्" — इत्युक्तरीत्या अस्य कालप्रवर्तकत्वं स्पष्टं, अधर्मगन्धरहितधर्मैकप्रधानत्वात् । एवं च त्रेतायुगेऽपि कात्स्न्र्येन कार्तयुगधर्मप्रवर्तनात्, "त्रेतायुगप्रवर्तितकार्तयुगवृत्तान्त", — इत्यन्वगृह्णन् श्रीमत्कविकथककण्ठीरवगुरवः । इदं च श्रीमद्रामायणे —

"प्रहृष्टमुदितो लोकस्तुष्टः पुष्टस्सुधार्मिकः ।" — इत्यारभ्य,

"चातुर्वर्ण्यं च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न पर्यदेवन्विधवा न च व्यालकृतं भयम् ।
न व्याधिजं भयं वाऽपि रामे राज्यं प्रशासति ॥"

इत्यादिवचनजातेनावबोधितम् । एतेनास्य राज्यपालनमन्यादृशमिति द्योत्यते ।

अथ स्वानुष्ठानमुखेन लोके धर्मप्रवर्तकत्वात्, "स्वधर्मान् गृहमेधीयान् बोधयन् धर्ममाचरेत् ।" – इत्युक्तरीत्या निरपेक्षेणापि सता लोकसंग्रहणाय श्रौतस्मार्तानि नित्यनैमित्तिकानि निजवर्णाश्रमानुरूपाणि कर्माण्यवश्यमनुष्ठेयानीति नीतिर्बोध्यते, यदगीयत भगवता, —

"न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥" – इति ।

एवं भगवतः श्रीरामस्य वर्णाश्रमधर्मानुष्ठानादिकमखिलमपि,

"यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥
न मे पार्थास्ति कर्तव्यं ... ... ।
... ... ॥
यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥"

इत्युक्तरीत्या लोके समाचारप्रवर्तनार्थमभिनयमात्रमवतारानुगुणम् । स्वरूपतस्तु स एव सर्वकर्मसमाराध्यः ।

"अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
ये यजन्ति पितॄन् देवान् ब्राह्मणान् सहुताशनान् ।
सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते ।
हव्यकव्यभुगेकस्त्वं ... ... ॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्याद्युक्तेः । एवं सर्वधर्मप्रवर्तकः सर्वकर्मसमाराध्यः स एव तादृशपरमधर्मोऽपि । "रामो विग्रहवान् धर्मः, सत्ये धर्म इवापरः" – इत्यादिकमत्र विभावनीयम् ।

अथैवं भगवतः आश्रितवत्सलस्याखिलकल्याणगुणगणाभिरामस्य श्रीरामस्य साधुजनपरित्राणादिकमवतारप्रयोजनं निष्पाद्यावतारसमापनावसरे स्वविषयवासिनश्चराचरात्मकस्य कृत्स्नस्य जन्तुजातस्य परगतिप्रदानेन निरतिशयमाहात्म्यं प्रकाशितं भवति । तथा हि —

"त्वामामनन्ति कवयः करुणामृताब्धे
ज्ञानक्रियाभजनलभ्यमलभ्यमन्यैः ।
एतेषु केन वरदोत्तरकोसलस्थाः
पूर्वं सदूर्वमभजन्त हि जन्तवस्त्वाम् ॥"

इत्युक्तरीत्या ब्राह्मणक्षत्रियादिवर्णभेदोऽसमीक्षितः, भक्तिप्रपत्त्याद्युपायविशेषोऽनपेक्षितः, चराचरादिस्वरूपभेदोऽनादृतः, विषयवासमात्रमालम्ब्यादूर्वमाद्विजं सर्वस्यापि जन्तुजातस्य दिव्यलोकदानेनास्यावाङ्मनसगोचरो वैभवातिशयो नितरां प्रकाशितः । अत्र श्रीमद्रामायणम्,

"रामस्य दक्षिणे पार्श्वे सपद्मा श्रीरुपाश्रिता ।
सव्येतु श्रीमहादेवी व्यवसायस्तथाग्रतः ॥" – इत्यारभ्य,

यानि भूतानि नगरेऽप्यन्तर्धानगतानि च ।
राघवं तान्यनुययुः स्वर्गाय समुपस्थितम् ॥

यानिं पश्यन्ति काकुत्स्थं स्थावराणि चराणि च ।
सर्वाणि राजगमने ह्यनुजग्मुर्हि तान्यपि ॥

नोच्छ्वसत्तदयोध्यायां सुसूक्ष्ममपि दृश्यते ।
तिर्यग्योनिगताश्चापि सर्वे राममनुव्रताः ॥" इत्यन्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अथ विष्णुर्महातेजाः पितामहमुवाच ह ।
एषां लोकं जनौघानां दातुमर्हसि सुव्रत ॥

इमे हि सर्वे स्नेहान्मां अनुयाता मनस्विनः ।
भक्ता हि भजितव्याश्च त्यक्तात्मानश्च मत्कृते ॥

तच्छ्रुत्वा विष्णुवचनं ब्रह्मा लोकगुरुः प्रभुः ।
लोकान्सान्तानिकान्नाम यास्यन्तीमे समागताः ॥

यच्च तिर्यग्गतं किंचित्त्वामेवमनुचिन्तयन् ।
प्राणांस्त्यक्ष्यति भक्त्या वै तत्सन्ताने निवत्स्यति ॥

सर्वैर्ब्रह्मगुणैर्युक्ते ब्रह्मलोकादनन्तरे ।" – इति च ।

एतेनास्य सर्वस्मात्परत्वं सकलफलप्रदातृत्वं च सुव्यक्तम् । अत एवोच्यते श्रीमदागमान्तदेशिकैस्तद्वद्ये "साकेतजनपदजनिधनिकजंगम-तदितरजन्तुजातदिव्यगतिदानदर्शितनित्यनिस्सीमवैभव ॥" – इति ।

अथेममाश्रितावनार्थं अवनावतीर्य तादृशसाधुजनविरोधिताटका-ताटकेयविराधकबन्धवालिसपरिकररावणादिदुष्कृद्विनाशनं तत्तादृशधर्म-संस्थापनं च विहितवान् श्रीरामभद्र एवाखिलशास्त्रसम्मतमोक्षप्रदश्रीम-न्नारायणः, भवतपनतापितभक्तजनभद्रारामत्वात् । यथा हि निदाघे नखंपचे पथि ललाटन्तपैः प्रकामदुस्सहैः प्रभाकरकिरणनिवहैर्नितान्तसन्तापितानां दिङ्मूढानां समापत्तिद्दष्टेन धार्मिकेन केनचित् प्रदर्शितमार्गतया स्वसकाशं प्राप्तानां पान्थानां कलनिनदराजहंसमिथुनाध्यासित दरविकसित सारसषण्डमण्डित मधुरतरातिनिर्मल सुशीतलपानीयभरित दीर्घिकोपशोभि-तान्तःप्रदेशः, स्वादुतर फलभरविनम्राम्रपनस कदलीकपित्थ नारीकेल-नारङ्गादिफलतरुभिः सुस्निग्धच्छायाशीतलैर्नमेरुप्रभृतिभिः छायाविटपिभिः अनवरतपरिस्रवन्मकरन्दरसासारामोदसमाकृष्ट रोलम्बनिकुरुम्ब संशोभित-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मञ्जरीपुञ्जरञ्जितैः, पाटलाशोकपुन्नागवकुलचम्पकप्रमुखैः कुसुमशाखिभिः निरन्तरनिपतित सुमनोहरसुशीतलश्लक्ष्णशिलातलालंकृतान्तरालैर्मालत्यादिलतानिकुञ्जजालैः वीचिमालापरिचयमसृणेन मन्दमारुतेनापि माननीयतमो मङ्गलारामो निखिलेन्द्रियनिर्वृतिजनको भवति; तथाऽतिमहति संसारमरुकान्तारे दुर्निवारैर्दारापत्यादिस्नेहमयैर्ग्रीष्मोष्मभिः क्ष्रियमानानां कल्पकोटिनियुतानुभवेऽप्यनाश्यैरनुक्षणमाचर्यमाणैः अनन्तैरपराधवर्गैः अलब्धस्वाधिगमोपायानां, कदाचिदज्ञातयादृच्छिकानुपङ्क्तिकादिसुकृतविशेषाधीनस्वकीयप्रथमकटाक्षोपज्ञसदाचार्यसमागममहिमावगत स्वप्राप्त्युपायसन्मार्गपरिशीलननिर्मलान्तःकरणानां स्वात्मानमनुभवतां भक्तजनानां, "रामः कमलपत्राक्षस्सर्वसत्त्वमनोहरः ॥" – इत्युक्तरीत्या आश्रितजनसर्वतापनिर्वापककरुणामृतरसपरिपूर्णप्रसन्नविलोचनारविन्दः, "रूपौदार्यगुणैः पुंसां ... ... ॥" इत्युक्तरीत्या सकलजनमनोनयनासेचनकरूपौदार्यसौशील्यसौन्दर्यलावण्यादि लीलागृहायितः, "रामो रामो राम" इत्युक्तरीत्या भावुकजनानुसन्धीयमानसर्वज्ञत्वसर्वशक्तित्व सत्यसंकल्पत्व कारुणिकत्व वत्सलत्वादि गुणगणगम्भीरः कन्दर्प इव मूर्तः, करुणाराशिरिव कृतावतारः, आनन्द इवाधिगतविग्रहः सीतासमेतश्रीरामभद्र एवंविधस्वात्मसाक्षात्कारं संपाद्य विगलितवेद्यान्तरममन्दमानन्दं प्रापयति। एतेनास्य मोक्षप्रदत्वमुक्तम्।

अथैतादृश सकलकल्याणगुणगणरत्नाकरः कः? – इत्यपेक्षायां,

"बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तश्श्रूयतां नरः॥

इक्ष्वाकुवंशप्रभवो रामो नाम जनैश्श्रुतः।
न चान्योऽर्हति काव्यानां यशोभाग्राघवादृते॥"

इत्याद्युक्तरीत्या नाम्नैव प्रतिपन्नमहिमा भगवान् श्रीरामभद्र एवेति ज्ञायते,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"रामभद्र" -- इति गद्येन। रमयति सर्वानिति रामः। "रामो रमयतां वरः" -- इत्युक्तेः। रमासंबन्धीति वा रामः। नित्यानपायश्रिया प्राप्तातिशय इत्यर्थः। स भद्र इव रामभद्रः। भद्रो वृषभः। अयं च श्रेष्ठार्थगोचरः। एवं च, "तमेवंगुणसंपन्नं, ज्येष्ठं श्रेष्ठगुणैर्युक्तं, एवं श्रेष्ठगुणैर्युक्तं, गुणैर्विरुरुचे रामः, स च सर्वगुणोपेतः", -- इत्याद्युक्तरीत्या स्वेतरसमस्तपुरुषदुर्लभसकलकल्याणगुणगणश्रेष्ठः श्रीराम एवेति भावः। यद्वा, भद्रं अस्यास्तीति भद्रः; "अर्श आद्यच्" -- भद्रश्चासौ रामश्चेति परनिपातः। तथा च, "मङ्गलानां च मङ्गलं, अनन्याधीन-कल्याणमन्यकल्याणभाजनम्" -- इत्याद्युक्तरीत्या निरतिशयमङ्गलस्वरूपत्व मङ्गलकरत्वविशिष्टः श्रीराम एवेति भावः।

एवमुक्तानुक्तनिखिलकल्याणगुणगणरत्नरत्नाकराय श्रीरामभद्राय शेषत्वोचितः भरन्यासापरपर्यायः मानसकायिकवाचिककैङ्कर्यसारभूत-सुकरतमः नमस्कारः पुनः पुनः भवतु। नमस्कारो नाम स्वोत्कृष्टावधिक-स्वापकर्षबोधनानुकूलव्यापारविशेषः। एतादृशनमस्कारप्रभावश्च श्रीरहस्य-रक्षायां श्रीमदाचार्यपादैः,

"प्रणम्य कृष्णं सहसा पांसुक्षिप्ते महीतले।
निष्कल्मषो भवेत्सद्यः ललाटे पांसुमण्डनात्॥

दुर्गसंसारकान्तारमपारमभिधावताम्।
एकः कृष्णनमस्कारः मुक्तितीरस्य देशिकः।

एकोऽपि कृष्णे सुकृतप्रणामो दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय॥

नमस्कारः कृतो यज्ञस्सर्वयज्ञोत्तमोत्तमः॥"

इत्यादिप्रमाणोपन्यासैः प्रतिपादितः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं श्रीरामभद्रगुणगणवर्णनरूपेऽप्यस्मिन् प्रबन्धे अन्येऽप्यभिमतार्था अवगम्यन्ते। तथा हि; – ब्रह्मादिकृतस्तोत्रेण श्रीरामरूपिणः परमात्मनः अखिलजगज्जन्मादिहेतुत्वं, हरधनुर्भङ्गादिवृत्तान्तेन तदवाध्यत्वं, गृध्रराजदेहदिधक्षासाकेतजनपदजनिधनिकजंगमतदितरदिव्यगतिदानदर्शनादिना आक्षेपतः प्राप्तोपायत्वेन सह सकलफलप्रदत्वं इत्यादिशारीरकचतुरध्याय्यर्था अभिव्यञ्जिताः।

अन्यच्च, कौमारकेलिगोपायितकौशिकाध्वरत्वादिना, मुमुक्षोः "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" – इत्युक्तरीत्या ब्रह्मविद्याधिगमार्थं सदाचार्योपसदनतच्छुश्रूषादिकं, कुशिकसुतकथितकथादिवृत्तान्तेन, – "तस्मै स विद्वानुपसन्नाय सम्यक्" – इत्याद्युक्तरीत्या सम्यगुपासिताद्याचार्यात् ब्रह्मविद्याप्राप्तिः, पितृवचनपालनादिना, "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" – इत्याद्युक्तरीत्या तदुपदेशेन अल्पास्थिरफलकस्वर्गादिभोगवैतृष्ण्यं, भरद्वाजशासनपरिगृहीतचित्रकूटगिरिकटकतटरम्यावसथत्वेन तदुपदेशेनैव, "कुटुम्बे शुचौ देशे" – इत्याद्युक्तरीत्या शरीरावस्थितिसमये समुचितदेशावस्थानधर्माचरणादिकं, मुनिजनभजनमुपितहृदयकलुषशवरीमोक्षसाक्षीभूतत्वादिवृत्तान्तेन, "स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते" – इत्युक्तरीत्या शरीरावसानानन्तरमक्षय्यानन्तफल परब्रह्मावाप्तिरित्यादिकं द्योत्यते।

पुनश्च पूज्यानामनुवर्तनं, सर्वदा पितृवचोऽनुल्लङ्घनं, सख्ये चाभिरतिः, कृते प्रतिकृतिः, सम्यक्सुहृत्संग्रहः, लोकानामनुरंजनं लोकापवादस्य परिहृतिः, इत्यादिलौकिकी व्यवहारपद्धतिश्चेहाभिव्याञ्जिता।

एवमन्येऽप्यर्थाः सुधीभिरवलोनीया इति सर्वं रमणीयम्।

— प्रीयतां जानकीसखः —

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
१९	९	सुलक्ष्मण	सुलक्षण
२१	६	त	तं
२९	१०	मृ यामो	मृष्यामो
,,	१५	दूषकानां	दूषकाणां
३१	७	केवल	न केवल
३७	१७	जटायु रा	जटायुव्यापारेण रा
४०	,,	शेखरैः	देशिकैः
५७	११	हस्य	हस्त
५९	३	पती	वती
७४	१४	नय	नस्य
४३	१५	उत शाखामृगत्वमव-लम्ब्येति चेत्	उत शाखामृगत्वमवलम्ब्य? शास्त्रवश्यतामवलम्ब्येति चेत्,



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE